# ऋग्वेद मण्डल ५

(३५५)

अबोध्य् अग्निः समिधा जनानाम् प्रति धेनुम् इवायतीम् उषासम् ।
यह्वा इव प्र वयाम् उज्जिहानाः प्र भानवः सिस्रते नाकम् अच्छ ॥ ५ ००१ ०१
अबोधि होता यजथाय देवान् ऊर्ध्वो अग्निः सुमनाः प्रातर् अस्थात् ।
समिद्धस्य रुशद् अदर्शि पाजो महान् देवस् तमसो निर् अमोचि ॥ ५ ००१ ०२
यद् ईं गणस्य रशनाम् अजीगः शुचिर् अङ्क्ते शुचिभिर् गोभिर् अग्निः ।
आद् दक्षिणा युज्यते वाजयन्त्य् उत्तानाम् ऊर्ध्वो अधयज् जुहूभिः ॥ ५ ००१ ०३
अग्निम् अच्छा देवयताम् मनांसि चक्षूंषीव सूर्ये सं चरन्ति ।
यद् ई सुवाते उषसा विरूपे श्वेतो वाजी जायते अग्रे अह्नाम् ॥ ५ ००१ ०४
जनिष्ट हि जेन्यो अग्रे अह्नां हितो हितेष्व् अरुषो वनेषु ।
दमे-दमे सप्त रत्ना दधानो ऽग्निर् होता नि षसादा यजीयान् ॥ ५ ००१ ०५
अग्निर् होता न्य् असीदद् यजीयान् उपस्थे मातुः सुरभा उलोके ।
युवा कविः पुरुनिष्ठ ऋतावा धर्ता कृष्टीनाम् उत मध्य इद्धः ॥ ५ ००१ ०६
प्र णु त्यं विप्रम् अध्वरेषु साधुम् अग्निं होतारम् ईळते नमोभिः ।
आ यस् ततान रोदसी ऋतेन नित्यम् मृजन्ति वाजिनं घृतेन ॥ ५ ००१ ०७
मार्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अतिथिः शिवो नः ।
सहस्रशृङ्गो वृषभस् तदोजा विश्वाँ अग्ने सहसा प्रास्य् अन्यान् ॥ ५ ००१ ०८
प्र सद्यो अग्ने अत्य् एष्य् अन्यान् आविर् यस्मै चारुतमो बभूथ ।
ईळेन्यो वपुष्यो विभावा प्रियो विशाम् अतिथिर् मानुषीणाम् ॥ ५ ००१ ०९
तुभ्यम् भरन्ति क्षितयो यविष्ठ बलिम् अग्ने अन्तित ओत दूरात् ।
आ भन्दिष्ठस्य सुमतिं चिकिद्धि बृहत् ते अग्ने महि शर्म भद्रम् ॥ ५ ००१ १०
आद्य रथम् भानुमो भानुमन्तम् अग्ने तिष्ठ यजतेभिः समन्तम् ।
विद्वान् पथीनाम् उर्व् अ १ न्तरिक्षम् एह देवान् हविरद्याय वक्षि ॥ ५ ००१ ११
अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोमम् अग्नौ दिवीव रुक्मम् उरुव्यञ्चम् अश्रेत् ॥ ५ ००१ १२

(३५६)
कुमारम् माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे ।
अनीकम् अस्य न मिनज् जनासः पुरः पश्यन्ति निहितम् अरतौ ॥ ५ ००२ ०१
कम् एतं त्वं युवते कुमारम् पेषी बिभर्षि महिषी जजान ।
पूर्वीर् हि गर्भः शरदो ववर्धापश्यं जातं यद् असूत माता ॥ ५ ००२ ०२
हिरण्यदन्तं शुचिवर्णम् आरात् क्षेत्राद् अपश्यम् आयुधा मिमानम् ।
ददानो अस्मा अमृतं विपृक्वत् किम् माम् अनिन्द्राः कृणवन्न् अनुक्थाः ॥ ५ ००२ ०३
क्षेत्राद् अपश्यं सनुतश् चरन्तं सुमद् यूथं न पुरु शोभमानम् ।
न ता अगृभ्रन्न् अजनिष्ट हि षः पलिक्नीर् इद् युवतयो भवन्ति ॥ ५ ००२ ०४
के मे मर्यकं वि यवन्त गोभिर् न येषां गोपा अरणश् चिद् आस ।
य ईं जगृभुर् अव ते सृजन्त्व् आजाति पश्व उप नश् चिकित्वान् ॥ ५ ००२ ०५
वसां राजानं वसतिं जनानाम् अरातयो नि दधुर् मर्त्येषु ।
ब्रह्माण्य् अत्रेर् अव तं सृजन्तु निन्दितारो निन्द्यासो भवन्तु ॥ ५ ००२ ०६
शुनश् चिच् छेपं निदितं सहस्राद् यूपाद् अमुञ्चो अशमिष्ट हि षः ।
एवास्मद् अग्ने वि मुमुग्धि पाशान् होतश् चिकित्व इह तू निषद्य ॥ ५ ००२ ०७
हृणीयमानो अप हि मद् ऐयेः प्र मे देवानां व्रतपा उवाच ।
इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहम् अग्ने अनुशिष्ट आगाम् ॥ ५ ००२ ०८
वि ज्योतिषा बृहता भात्य् अग्निर् आविर् विश्वानि कृणुते महित्वा ।
प्रादेवीर् मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥ ५ ००२ ०९
उत स्वानासो दिवि षन्त्व् अग्नेस् तिग्मायुधा रक्षसे हन्तवा उ ।
मदे चिद् अस्य प्र रुजन्ति भामा न वरन्ते परिबाधो अदेवीः ॥ ५ ००२ १०
एतं ते स्तोमं तुविजात विप्रो रथं न धीरः स्वपा अतक्षम् ।
यदीद् अग्ने प्रति त्वं देव हर्याः स्वर्वतीर् अप एना जयेम ॥ ५ ००२ ११
तुविग्रीवो वृषभो वावृधानो ऽशत्र्व् अ१र्यः सम् अजाति वेदः ।
इतीमम् अग्निम् अमृता अवोचन् बर्हिष्मते मनवे शर्म यंसद् धविष्मते मनवे शर्म यंसत्
॥ ५ ००२ १२

(३५८)

त्वम् अ॑ग्ने॒ वरु॑णो॒ जाय॑से॒ यत् त्वम् मि॒त्रो भ॑वसि॒ यत् समि॑द्धः ।
त्वे विश्वे॑ सहसस् पुत्र दे॒वास् त्वम् इन्द्रो॑ दा॒शुषे॒ मर्त्या॑य ॥ ५ ००३ ०१
त्वम् अ॑र्य॒मा भ॑वसि॒ यत् क॒नीनां॒ नाम॑ स्वधाव॒न् गुह्य॑म् बिभर्षि ।
अ॒ञ्जन्ति॑ मि॒त्रं सुधि॑तं॒ न गोभि॒र् यद् दम्प॑ती॒ सम॑नसा कृ॒णोषि॑ ॥ ५ ००३ ०२
तव॑ श्रि॒ये म॒रुतो॑ मर्जयन्त॒ रुद्र॒ यत् ते॒ जनि॑म॒ चारु॑ चि॒त्रम् ।
प॒दं यद् विष्णो॑र् उप॒मं नि॒धायि॒ तेन॑ पासि॒ गुह्य॒ं नाम॒ गोना॑म् ॥ ५ ००३ ०३
तव॑ श्रि॒या सु॒दृशो॑ देव दे॒वाः पु॒रू दधा॑ना अ॒मृतं॑ सपन्त ।
होता॑रम् अ॒ग्निम् मनु॑षो॒ नि षे॑दुर् दश॒स्यन्त॑ उ॒शिजः॒ शंस॑म् आ॒योः ॥ ५ ००३ ०४
न त्वद् धोता॒ पूर्वो॑ अग्ने॒ यजी॑या॒न् न काव्यैः॑ प॒रो अ॑स्ति स्वधावः ।
वि॒शश् च॒ यस्या॒ अति॑थि॒र् भवा॑सि॒ स य॒ज्ञेन॑ वनवद् देव॒ मर्ता॑न् ॥ ५ ००३ ०५
व॒यम् अ॑ग्ने वनुयाम॒ त्वोता॑ वसू॒यवो॑ ह॒विषा॒ बुध्य॑मानाः ।
व॒यं स॑म॒र्ये वि॒दथे॒ष्व् अह्नां॑ व॒यं रा॒या स॑हसस् पु॒त्र मर्ता॑न् ॥ ५ ००३ ०६
यो न॒ आगो॑ अ॒भ्य् एनो॒ भरा॒त्य् अधीद् अ॒घम् अ॒घशं॑से दधात ।
ज॒ही चि॑कित्वो अ॒भिश॑स्तिम् ए॒ताम् अग्ने॒ यो नो॑ म॒र्चय॑ति द्व॒येन॑ ॥ ५ ००३ ०७
त्वाम् अ॒स्या व्युषि॑ देव॒ पूर्वे॑ दू॒तं कृ॑ण्वा॒ना अ॑यजन्त ह॒व्यैः ।
सं॒स्थे यद् अ॑ग्न॒ ईय॑से रयी॒णां दे॒वो मर्तै॒र् वसु॑भिर् इ॒ध्यमा॑नः ॥ ५ ००३ ०८
अव॑ स्पृधि पि॒तरं॒ योधि॑ वि॒द्वान् पु॒त्रो यस् ते॑ सहसः सून ऊ॒हे ।
क॒दा चि॑कित्वो अ॒भि च॑क्षसे॒ नो ऽग्ने॑ क॒दाँ ऋ॑त॒चिद् या॑तयासे ॥ ५ ००३ ०९
भूरि॒ नाम॒ वन्द॑मानो दधाति पि॒ता व॑सो॒ यदि॒ तज् जो॒षया॑से ।
कु॒विद् दे॒वस्य॒ सह॑सा चका॒नः सु॒म्नम् अ॒ग्निर् व॑नते वावृधा॒नः ॥ ५ ००३ १०
त्वम् अ॒ङ्ग ज॑रि॒तारं॑ यविष्ठ॒ विश्वा॑न्य् अग्ने दुरि॒ताति॑ पर्षि ।
स्ते॒ना अ॑दृश्रन् रि॒पवो॒ जना॒सो ऽज्ञा॑तकेता वृजि॒ना अ॑भूवन् ॥ ५ ००३ ११
इ॒मे यामा॑सस् त्व॒द्रिग् अ॑भूव॒न् वस॑वे वा॒ तद् इद् आगो॑ अवाचि ।
नाहा॒यम् अ॒ग्निर् अ॒भिश॑स्तये नो॒ न रीष॑ते वावृधा॒नः परा॑ दात् ॥ ५ ००३ १२

(३५९)

त्वाम् अग्ने वसुपतिं वसूनाम् अभि प्र मन्दे अध्वरेषु राजन् ।
त्वया वाजं वाजयन्तो जयेमाभि ष्याम पृत्सुतीर् मर्त्यानाम् ॥ ५ ००४ ०१
हव्यवाळ् अग्निर् अजरः पिता नो विभुर् विभावा सुदृशीको अस्मे ।
सुगार्हपत्याः सम् इषो दिदीह्य् अस्मद्र्य१क् सम् मिमीहि श्रवांसि ॥ ५ ००४ ०२
विशां कविं विश्पतिम् मानुषीणां शुचिम् पावकं घृतपृष्ठम् अग्निम् ।
नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि ॥ ५ ००४ ०३
जुषस्वाग्न इळया सजोषा यतमानो रश्मिभिः सूर्यस्य ।
जुषस्व नः समिधं जातवेद आ च देवान् हविरद्याय वक्षि ॥ ५ ००४ ०४
जुष्टो दमूना अतिथिर् दुरोण इमं नो यज्ञम् उप याहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्या शत्रूयताम् आ भरा भोजनानि ॥ ५ ००४ ०५
वधेन दस्युम् प्र हि चातयस्व वयः कृण्वानस् तन्वे३ स्वायै ।
पिपर्षि यत् सहसस् पुत्र देवान्त् सो अग्ने पाहि नृतम वाजे अस्मान् ॥ ५ ००४ ०६
वयं ते अग्न उक्थैर् विधेम वयं हव्यैः पावक भद्रशोचे ।
अस्मे रयिं विश्ववारं सम् इन्वास्मे विश्वानि द्रविणानि धेहि ॥ ५ ००४ ०७
अस्माकम् अग्ने अध्वरं जुषस्व सहसः सूनो त्रिषधस्थ हव्यम् ।
वयं देवेषु सुकृतः स्याम शर्मणा नस् त्रिवरूथेन पाहि ॥ ५ ००४ ०८
विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरितातिपर्षि ।
अग्ने अत्रिवन् नमसा गृणानो ऽस्माकम् बोध्य् अविता तनूनाम् ॥ ५ ००४ ०९
यस् त्वा हृदा कीरिणा मन्यमानो ऽमर्त्यम् मर्त्यो जोहवीमि ।
जातवेदो यशो अस्मासु धेहि प्रजाभिर् अग्ने अमृतत्वम् अश्याम् ॥ ५ ००४ १०
यस्मै त्वं सुकृते जातवेद उलोकम् अग्ने कृणवः स्योनम् ।
अश्विनं स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति ॥ ५ ००४ ११

(३५९)
सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन ।
अग्नये जातवेदसे ॥ ५ ००५ ०१
नराशंसः सुषूदतीमं यज्ञम् अदाभ्यः ।

कविर् हि मधुहस्त्यः ॥ ५ ००५ ०२
ईळितो अग्न आ वहेन्द्रं चित्रम् इह प्रियम् ।
सुखै रथेभिर् ऊतये ॥ ५ ००५ ०३
ऊर्णम्रदा वि प्रथस्वाभ्य् अ १ र्का अनूषत ।
भवा नः शुभ्र सातये ॥ ५ ००५ ०४
देवीर् द्वारो वि श्रयध्वं सुप्रायणा न ऊतये ।
प्र-प्र यज्ञम् पृणीतन ॥ ५ ००५ ०५
सुप्रतीके वयोवृधा यह्वी ऋतस्य मातरा ।
दोषाम् उषासम् ईमहे ॥ ५ ००५ ०६
वातस्य पत्मन्न् ईळिता दैव्या होतारा मनुषः ।
इमं नो यज्ञम् आ गतम् ॥ ५ ००५ ०७
इळा सरस्वती मही तिस्रो देवीर् मयोभुवः ।
बर्हिः सीदन्त्व् अस्रिधः ॥ ५ ००५ ०८
शिवस् त्वष्टर् इहा गहि विभुः पोष उत त्मना ।
यज्ञे-यज्ञे न उद् अव ॥ ५ ००५ ०९
यत्र वेत्थ वनस्पते देवानां गुह्या नामानि ।
तत्र हव्यानि गामय ॥ ५ ००५ १०
स्वाहाग्नये वरुणाय स्वाहेन्द्राय मरुद्भ्यः स्वाहा देवेभ्यो हविः ।

(३६०)
अग्निं तम् मन्ये यो वसुर् अस्तं यं यन्ति धेनवः ।
अस्तम् अर्वन्त आशवो ऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥ ५ ००६ ०१
सो अग्निर् यो वसुर् गृणे सं यम् आयन्ति धेनवः ।
सम् अर्वन्तो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर ॥ ५ ००६ ०२
अग्निर् हि वाजिनं विशे ददाति विश्वचर्षणिः ।
अग्नी राये स्वाभुवं स प्रीतो याति वार्यम् इषं स्तोतृभ्य आ भर ॥ ५ ००६ ०३
आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।

यद् ध स्या ते पनीयसी समिद् दीदयति द्यवीषं स्तोतृभ्य आ भर ॥ ५ ००६ ०४
आ ते अग्न ऋचा हविः शुक्रस्य शोचिषस् पते ।
सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥ ५ ००६ ०५
प्रो त्ये अग्नयो ऽग्निषु विश्वम् पुष्यन्ति वार्यम् ।
ते हिन्विरे त इन्विरे त इषण्यन्त्य् आनुषग् इषं स्तोतृभ्य आ भर ॥ ५ ००६ ०६
तव त्ये अग्ने अर्चयो महि व्राधन्त वाजिनः ।
ये पत्वभिः शफानां व्रजा भुरन्त गोनाम् इषं स्तोतृभ्य आ भर ॥ ५ ००६ ०७
नवा नो अग्न आ भर स्तोतृभ्यः सुक्षितीर् इषः ।
ते स्याम य आनृचुस् त्वादूतासो दमे-दम इषं स्तोतृभ्य आ भर ॥ ५ ००६ ०८
उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।
उतो न उत् पुपूर्या उक्थेषु शवसस् पत इषं स्तोतृभ्य आ भर ॥ ५ ००६ ०९
एवाँ अग्निम् अजुर्यमुर् गीर्भिर् यज्ञेभिर् आनुषक् ।
दधद् अस्मे सुवीर्यम् उत त्यद् आश्वश्व्यम् इषं स्तोतृभ्य आ भर ॥ ५ ००६ १०

(३६१)
सखायः सं वः सम्यञ्चम् इषं स्तोमं चाग्नये ।
वर्षिष्ठाय क्षितीनाम् ऊर्जो नप्त्रे सहस्वते ॥ ५ ००७ ०१
कुत्रा चिद् यस्य समृतौ रण्वा नरो नृषदने ।
अर्हन्तश् चिद् यम् इन्धते संजनयन्ति जन्तवः ॥ ५ ००७ ०२
सं यद् इषो वनामहे सं हव्या मानुषाणाम् ।
उत द्युम्नस्य शवस ऋतस्य रश्मिम् आ ददे ॥ ५ ००७ ०३
स स्मा कृणोति केतुम् आ नक्तं चिद् दूर आ सते ।
पावको यद् वनस्पतीन् प्र स्मा मिनात्य् अजरः ॥ ५ ००७ ०४
अव स्म यस्य वेषणे स्वेदम् पथिषु जुह्वति ।
अभीम् अह स्वजेन्यम् भूमा पृष्ठेव रुरुहुः ॥ ५ ००७ ०५
यम् मर्त्यः पुरुस्पृहं विदद् विश्वस्य धायसे ।
प्र स्वादनम् पितूनाम् अस्ततातिं चिद् आयवे ॥ ५ ००७ ०६

स हि ष्मा धन्वाक्षितं दाता न दात्य् आ पशुः ।
हिरिश्मश्रुः शुचिदन्न् ऋभुर् अनिभृष्टतविषिः ॥ ५ ००७ ०७
शुचिः ष्मा यस्मा अत्रिवत् प्र स्वधितीव रीयते ।
सुषूर् असूत माता क्राणा यद् आनशे भगम् ॥ ५ ००७ ०८
आ यस् ते सर्पिरासुते ऽग्ने शम् अस्ति धायसे ।
ऐषु द्युम्नम् उत श्रव आ चित्तम् मर्त्येषु धाः ॥ ५ ००७ ०९
इति चिन् मन्युम् अध्रिजस् त्वादातम् आ पशुं ददे ।
आद् अग्ने अपृणतो ऽत्रिः सासह्याद् दस्यून् इषः सासह्यान् नॄन् ॥ ५ ००७ १०

(३६२)
त्वाम् अग्न ऋतायवः सम् ईधिरे प्रत्नम् प्रत्नास ऊतये सहस्कृत ।
पुरुश्चन्द्रं यजतं विश्वधायसं दमूनसं गृहपतिं वरेण्यम् ॥ ५ ००८ ०१
त्वाम् अग्ने अतिथिम् पूर्व्यं विशः शोचिष्केशं गृहपतिं नि षेदिरे ।
बृहत्केतुम् पुरुरूपं धनस्पृतं सुशर्माणं स्ववसं जरद्विषम् ॥ ५ ००८ ०२
त्वाम् अग्ने मानुषीर् ईळते विशो होत्राविदं विविचिं रत्नधातमम् ।
गुहा सन्तं सुभग विश्वदर्शतं तुविष्वणसं सुयजं घृतश्रियम् ॥ ५ ००८ ०३
त्वाम् अग्ने धर्णसिं विश्वधा वयं गीर्भिर् गृणन्तो नमसोप सेदिम ।
स नो जुषस्व समिधानो अङ्गिरो देवो मर्तस्य यशसा सुदीतिभिः ॥ ५ ००८ ०४
त्वम् अग्ने पुरुरूपो विशे-विशे वयो दधासि प्रत्नथा पुरुष्टुत ।
पुरूण्य् अन्ना सहसा वि राजसि त्विषिः सा ते तित्विषाणस्य नाधृषे ॥ ५ ००८ ०५
त्वाम् अग्ने समिधानं यविष्ठ्य देवा दूतं चक्रिरे हव्यवाहनम् ।
उरुज्रयसं घृतयोनिम् आहुतं त्वेषं चक्षुर् दधिरे चोदयन्मति ॥ ५ ००८ ०६
त्वाम् अग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा सम् ईधिरे ।
स वावृधान ओषधीभिर् उक्षितो ऽभि ज्रयांसि पार्थिवा वि तिष्ठसे ॥ ५ ००८ ०७

(३६३)

त्वाम् अग्ने हविष्मन्तो देवम् मर्तास ईळते ।
मन्ये त्वा जातवेदसं स हव्या वक्ष्य् आनुषक् ॥ ५ ००९ ०१
अग्निर् होता दास्वतः क्षयस्य वृक्तबर्हिषः ।
सं यज्ञासश् चरन्ति यं सं वाजासः श्रवस्यवः ॥ ५ ००९ ०२
उत स्म यं शिशुं यथा नवं जनिष्टारणी ।
धर्तारम् मानुषीणां विशाम् अग्निं स्वध्वरम् ॥ ५ ००९ ०३
उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणाम् ।
पुरू यो दग्धासि वनाग्ने पशुर् न यवसे ॥ ५ ००९ ०४
अध स्म यस्यार्चयः सम्यक् संयन्ति धूमिनः ।
यद् ईम् अह त्रितो दिव्य् उप ध्मातेव धमति शिशीते ध्मातरी यथा ॥ ५ ००९ ०५
तवाहम् अग्न ऊतिभिर् मित्रस्य च प्रशस्तिभिः ।
द्वेषोयुतो न दुरिता तुर्याम मर्त्यानाम् ॥ ५ ००९ ०६
तं नो अग्ने अभी नरो रयिं सहस्व आ भर ।
स क्षेपयत् स पोषयद् भुवद् वाजस्य सातय उतैधि पृत्सु नो वृधे ॥ ५ ००९ ०७

(३६४)
अग्न ओजिष्ठम् आ भर द्युम्नम् अस्मभ्यम् अध्रिगो ।
प्र नो राया परीणसा रत्सि वाजाय पन्थाम् ॥ ५ ०१० ०१
त्वं नो अग्ने अद्भुत क्रत्वा दक्षस्य मंहना ।
त्वे असुर्य१म् आरुहत् क्राणा मित्रो न यज्ञियः ॥ ५ ०१० ०२
त्वं नो अग्न एषां गयम् पुष्टिं च वर्धय ।
ये स्तोमेभिः प्र सूरयो नरो मघान्य् आनशुः ॥ ५ ०१० ०३
ये अग्ने चन्द्र ते गिरः शुम्भन्त्य् अश्वराधसः ।
शुष्मेभिः शुष्मिणो नरो दिवश् चिद् येषाम् बृहत् सुकीर्तिर् बोधति त्मना ॥ ५ ०१० ०४
तव त्ये अग्ने अर्चयो भ्राजन्तो यन्ति धृष्णुया ।
परिज्मानो न विद्युतः स्वानो रथो न वाजयुः ॥ ५ ०१० ०५
नू नो अग्न ऊतये सबाधसश् च रातये ।

अस्माकासश् च सूरयो विश्वा आशास् तरीषणि ॥ ५ ०१० ०६
त्वं नो अग्ने अङ्गिर स्तुत स्तवान आ भर ।
होतर् विभ्वासहं रयिं स्तोतृभ्य स्तवसे च न उतैधि पृत्सु नो वृधे ॥ ५ ०१० ०७

(३६५)
जनस्य गोपा अजनिष्ट जागृविर् अग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद् वि भाति भरतेभ्यः शुचिः ॥ ५ ०११ ०१
यज्ञस्य केतुम् प्रथमम् पुरोहितम् अग्निं नरस् त्रिषधस्थे सम् ईधिरे ।
इन्द्रेण देवैः सरथं स बर्हिषि सीदन् नि होता यजथाय सुक्रतुः ॥ ५ ०११ ०२
असम्मृष्टो जायसे मात्रोः शुचिर् मन्द्रः कविर् उद् अतिष्ठो विवस्वतः ।
घृतेन त्वावर्धयन्न् अग्न आहुत धूमस् ते केतुर् अभवद् दिवि श्रितः ॥ ५ ०११ ०३
अग्निर् नो यज्ञम् उप वेतु साधुयाग्निं नरो वि भरन्ते गृहे-गृहे ।
अग्निर् दूतो अभवद् धव्यवाहनो ऽग्निं वृणाना वृणते कविक्रतुम् ॥ ५ ०११ ०४
तुभ्येदम् अग्ने मधुमत्तमं वचस् तुभ्यम् मनीषा इयम् अस्तु शं हृदे ।
त्वां गिरः सिन्धुम् इवावनीर् महीर् आ पृणन्ति शवसा वर्धयन्ति च ॥ ५ ०११ ०५
त्वाम् अग्ने अङ्गिरसो गुहा हितम् अन्व् अविन्दञ् छिश्रियाणं वने-वने ।
स जायसे मथ्यमानः सहो महत् त्वाम् आहुः सहसस् पुत्रम् अङ्गिरः ॥ ५ ०११ ०६

(३६६)
प्राग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्म ।
घृतं न यज्ञ आस्ये ३ सुपूतं गिरम् भरे वृषभाय प्रतीचीम् ॥ ५ ०१२ ०१
ऋतं चिकित्व ऋतम् इच् चिकिद्ध्य् ऋतस्य धारा अनु तृन्धि पूर्वीः ।
नाहं यातुं सहसा न द्वयेन ऋतं सपाम्य् अरुषस्य वृष्णः ॥ ५ ०१२ ०२
कया नो अग्न ऋतयन्न् ऋतेन भुवो नवेदा उचथस्य नव्यः ।
वेदा मे देव ऋतुपा ऋतूनां नाहम् पतिं सनितुर् अस्य रायः ॥ ५ ०१२ ०३
के ते अग्ने रिपवे बन्धनासः के पायवः सनिषन्त द्युमन्तः ।

के धासिम् अग्ने अनृतस्य पान्ति क आसतो वचसः सन्ति गोपाः ॥ ५ ०१२ ०४
सखायस् ते विषुणा अग्न एते शिवासः सन्तो अशिवा अभूवन् ।
अधूर्षत स्वयम् एते वचोभिर् ऋजूयते वृजिनानि ब्रुवन्तः ॥ ५ ०१२ ०५
यस् ते अग्ने नमसा यज्ञम् ईट्ट ऋतं स पात्य् अरुषस्य वृष्णः ।
तस्य क्षयः पृथुर् आ साधुर् एतु प्रसर्स्राणस्य नहुषस्य शेषः ॥ ५ ०१२ ०६

(३६७)
अर्चन्तस् त्वा हवामहे ऽर्चन्तः सम् इधीमहि ।
अग्ने अर्चन्त ऊतये ॥ ५ ०१३ ०१
अग्ने स्तोमम् मनामहे सिध्रम् अद्य दिविस्पृशः ।
देवस्य द्रविणस्यवः ॥ ५ ०१३ ०२
अग्निर् जुषत नो गिरो होता यो मानुषेष्व् आ ।
स यक्षद् दैव्यं जनम् ॥ ५ ०१३ ०३
त्वम् अग्ने सप्रथा असि जुष्टो होता वरेण्यः ।
त्वया यज्ञं वि तन्वते ॥ ५ ०१३ ०४
त्वाम् अग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम् ।
स नो रास्व सुवीर्यम् ॥ ५ ०१३ ०५
अग्ने नेमिर् अराँ इव देवांस् त्वम् परिभूर् असि ।
आ राधश् चित्रम् ऋञ्जसे ॥ ५ ०१३ ०६

(३६८)
अग्निं स्तोमेन बोधय समिधानो अमर्त्यम् ।
हव्या देवेषु नो दधत् ॥ ५ ०१४ ०१
तम् अध्वरेष्व् ईळते देवम् मर्ता अमर्त्यम् ।
यजिष्ठम् मानुषे जने ॥ ५ ०१४ ०२
तं हि शश्वन्त ईळते स्रुचा देवं घृतश्चुता ।

अग्निं हव्याय वोळ्हवे ॥ ५ ०१४ ०३
अग्निर् जातो अरोचत घ्नन् दस्यूञ् ज्योतिषा तमः ।
अविन्दद् गा अपः स्वः ॥ ५ ०१४ ०४
अग्निम् ईळेन्यं कविं घृतपृष्ठं सपर्यत ।
वेतु मे शृणवद् धवम् ॥ ५ ०१४ ०५
अग्निं घृतेन वावृधु स्तोमेभिर् विश्वचर्षणिम् ।
स्वाधीभिर् वचस्युभिः ॥ ५ ०१४ ०६

(३६९)
प्र वेधसे कवये वेद्याय गिरम् भरे यशसे पूर्व्याय ।
घृतप्रसत्तो असुरः सुशेवो रायो धर्ता धरुणो वस्वो अग्निः ॥ ५ ०१५ ०१
ऋतेन ऋतं धरुणं धारयन्त यज्ञस्य शाके परमे व्योमन् ।
दिवो धर्मन् धरुणे सेदुषो नॄञ् जातैर् अजाताꣳ अभि ये ननक्षुः ॥ ५ ०१५ ०२
अङ्होयुवस् तन्वस् तन्वते वि वयो महद् दुष्टरम् पूर्व्याय ।
स संवतो नवजातस् तुतुर्यात् सिङ्हं न क्रुद्धम् अभितः परि ष्ठुः ॥ ५ ०१५ ०३
मातेव यद् भरसे पप्रथानो जनं-जनं धायसे चक्षसे च ।
वयो-वयो जरसे यद् दधानः परि त्मना विषुरूपो जिगासि ॥ ५ ०१५ ०४
वाजो नु ते शवसस् पात्व् अन्तम् उरुं दोघं धरुणं देव रायः ।
पदं न तायुर् गुहा दधानो महो राये चितयन्न् अत्रिम् अस्पः ॥ ५ ०१५ ०५

(३७०)
बृहद् वयो हि भानवे ऽर्चा देवायाग्नये ।
यम् मित्रं न प्रशस्तिभिर् मर्तासो दधिरे पुरः ॥ ५ ०१६ ०१
स हि द्युभिर् जनानां होता दक्षस्य बाह्वोः ।
वि हव्यम् अग्निर् आनुषग् भगो न वारम् ऋण्वति ॥ ५ ०१६ ०२
अस्य स्तोमे मघोनः सख्ये वृद्धशोचिषः ।

विश्वा यस्मिन् तुविष्वणि सम् अर्ये शुष्मम् आदधुः ॥ ५ ०१६ ०३
अधा ह्य् अग्न एषां सुवीर्यस्य मंहना ।
तम् इद् यह्वं न रोदसी परि श्रवो बभूवतुः ॥ ५ ०१६ ०४
नू न एहि वार्यम् अग्ने गृणान आ भर ।
ये वयं ये च सूरयः स्वस्ति धामहे सचोतैधि पृत्सु नो वृधे ॥ ५ ०१६ ०५

(३७१)
आ यज्ञैर् देव मर्त्य इत्था तव्यांसम् ऊतये ।
अग्निं कृते स्वध्वरे पूरुर् ईळीतावसे ॥ ५ ०१७ ०१
अस्य हि स्वयशस्तर आसा विधर्मन् मन्यसे ।
तं नाकं चित्रशोचिषम् मन्द्रम् परो मनीषया ॥ ५ ०१७ ०२
अस्य वासा उ अर्चिषा य आयुक्त तुजा गिरा ।
दिवो न यस्य रेतसा बृहच् छोचन्त्य् अर्चयः ॥ ५ ०१७ ०३
अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ ।
अधा विश्वासु हव्यो ऽग्निर् विक्षु प्र शस्यते ॥ ५ ०१७ ०४
नू न इद् धि वार्यम् आसा सचन्त सूरयः ।
ऊर्जो नपाद् अभिष्टये पाहि शग्धि स्वस्तय उतैधि पृत्सु नो वृधे ॥ ५ ०१७ ०५

(३७२)
प्रातर् अग्निः पुरुप्रियो विश स्तवेतातिथिः ।
विश्वानि यो अमर्त्यो हव्या मर्तेषु रण्यति ॥ ५ ०१८ ०१
द्विताय मृक्तवाहसे स्वस्य दक्षस्य मंहना ।
इन्दुं स धत्त आनुषक् स्तोता चित् ते अमर्त्य ॥ ५ ०१८ ०२
तं वो दीर्घायुशोचिषं गिरा हुवे मघोनाम् ।
अरिष्टो येषां रथो व्य् अश्वदावन्न् ईयते ॥ ५ ०१८ ०३
चित्रा वा येषु दीधितिर् आसन्न् उक्था पान्ति ये ।

स्तीर्णम् बर्हिः स्वर्णरे श्रवांसि दधिरे परि ॥ ५ ०१८ ०४
ये मे पञ्चाशतं ददुर् अश्वानां सधस्तुति ।
द्युमद् अग्ने महि श्रवो बृहत् कृधि मघोनां नृवद् अमृत नृणाम् ॥ ५ ०१८ ०५

(३७३)
अभ्य् अवस्थाः प्र जायन्ते प्र वव्रेर् वव्रिश् चिकेत ।
उपस्थे मातुर् वि चष्टे ॥ ५ ०१९ ०१
जुहुरे वि चितयन्तो ऽनिमिषं नृम्णम् पान्ति ।
आ दृळ्हाम् पुरं विविशुः ॥ ५ ०१९ ०२
आ श्वैत्रेयस्य जन्तवो द्युमद् वर्धन्त कृष्टयः ।
निष्कग्रीवो बृहदुक्थ एना मध्वा न वाजयुः ॥ ५ ०१९ ०३
प्रियं दुग्धं न काम्यम् अजामि जाम्योः सचा ।
घर्मो न वाजजठरो ऽदब्धः शश्वतो दभः ॥ ५ ०१९ ०४
क्रीळन् नो रश्म आ भुवः सम् भस्मना वायुना वेविदानः ।
ता अस्य सन् धृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्थाः ॥ ५ ०१९ ०५

(३७४)
यम् अग्ने वाजसातम त्वं चिन् मन्यसे रयिम् ।
तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम् ॥ ५ ०२० ०१
ये अग्ने नेरयन्ति ते वृद्धा उग्रस्य शवसः ।
अप द्वेषो अप ह्वरो ऽन्यव्रतस्य सश्चिरे ॥ ५ ०२० ०२
होतारं त्वा वृणीमहे ऽग्ने दक्षस्य साधनम् ।
यज्ञेषु पूर्व्यं गिरा प्रयस्वन्तो हवामहे ॥ ५ ०२० ०३
इत्था यथा त ऊतये सहसावन् दिवे-दिवे ।
राय ऋताय सुक्रतो गोभिः ष्याम सधमादो वीरैः स्याम सधमादः ॥ ५ ०२० ०४

(३७५)
मनुष्वत् त्वा नि धीमहि मनुष्वत् सम् इधीमहि ।
अग्ने मनुष्वद् अङ्गिरो देवान् देवयते यज ॥ ५ ०२१ ०१
त्वं हि मानुषे जने ऽग्ने सुप्रीत इध्यसे ।
स्रुचस् त्वा यन्त्य् आनुषक् सुजात सर्पिरासुते ॥ ५ ०२१ ०२
त्वां विश्वे सजोषसो देवासो दूतम् अक्रत ।
सपर्यन्तस् त्वा कवे यज्ञेषु देवम् ईळते ॥ ५ ०२१ ०३
देवं वो देवयज्ययाग्निम् ईळीत मर्त्यः ।
समिद्धः शुक्र दीदिह्य् ऋतस्य योनिम् आसदः ससस्य योनिम् आसदः ॥ ५ ०२१ ०४

(३७६)
प्र विश्वसामन्न् अत्रिवद् अर्चा पावकशोचिषे ।
यो अध्वरेष्व् ईड्यो होता मन्द्रतमो विशि ॥ ५ ०२२ ०१
न्य् अ ३ ग्निं जातवेदसं दधाता देवम् ऋत्विजम् ।
प्र यज्ञ एत्व् आनुषग् अद्या देवव्यचस्तमः ॥ ५ ०२२ ०२
चिकित्विन्मनसं त्वा देवम् मर्तास ऊतये ।
वरेण्यस्य ते ऽवस इयानासो अमन्महि ॥ ५ ०२२ ०३
अग्ने चिकिद्ध्य् अ ३ स्य न इदं वचः सहस्य ।
तं त्वा सुशिप्र दम्पते स्तोमैर् वर्धन्त्य् अत्रयो गीर्भिः शुम्भन्त्य् अत्रयः ॥ ५ ०२२ ०४

(३७७)
अग्ने सहन्तम् आ भर द्युम्नस्य प्रासहा रयिम् ।
विश्वा यश् चर्षणीर् अभ्य् आ ३ सा वाजेषु सासहत् ॥ ५ ०२३ ०१
तम् अग्ने पृतनाषहं रयिं सहस्व आ भर ।
त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः ॥ ५ ०२३ ०२

विश्वे हि त्वा सजोषसो जनासो वृक्तबर्हिषः ।
होतारं सद्मसु प्रियं व्यन्ति वार्या पुरु ॥ ५ ०२३ ०३
स हि ष्मा विश्वचर्षणिर् अभिमाति सहो दधे ।
अग्न एषु क्षयेष्व् आ रेवन् नः शुक्र दीदिहि द्युमत् पावक दीदिहि ॥ ५ ०२३ ०४

(३७८)
अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
वसुर् अग्निर् वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ।
स नो बोधि श्रुधी हवम् उरुष्या णो अघायतः समस्मात् ।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनम् ईमहे सखिभ्यः ।

(३७९)
अच्छा वो अग्निम् अवसे देवं गासि स नो वसुः ।
रासत् पुत्र ऋषूणाम् ऋतावा पर्षति द्विषः ॥ ५ ०२५ ०१
स हि सत्यो यम् पूर्वे चिद् देवासश् चिद् यम् ईधिरे ।
होतारम् मन्द्रजिह्वम् इत् सुदीतिभिर् विभावसुम् ॥ ५ ०२५ ०२
स नो धीती वरिष्ठया श्रेष्ठया च सुमत्या ।
अग्ने रायो दिदीहि नः सुवृक्तिभिर् वरेण्य ॥ ५ ०२५ ०३
अग्निर् देवेषु राजत्य् अग्निर् मर्तेष्व् आविशन् ।
अग्निर् नो हव्यवाहनो ऽग्निं धीभिः सपर्यत ॥ ५ ०२५ ०४
अग्निस् तुविश्रवस्तमं तुविब्रह्माणम् उत्तमम् ।
अतूर्तं श्रावयत्पतिम् पुत्रं ददाति दाशुषे ॥ ५ ०२५ ०५
अग्निर् ददाति सत्पतिं सासाह यो युधा नृभिः ।
अग्निर् अत्यं रघुष्यदं जेतारम् अपराजितम् ॥ ५ ०२५ ०६
यद् वाहिष्ठं तद् अग्नये बृहद् अर्च विभावसो ।
महिषीव त्वद् रयिस् त्वद् वाजा उद् ईरते ॥ ५ ०२५ ०७

तव द्युमन्तो अर्चयो ग्रावेवोच्यते बृहत् ।
उतो ते तन्यतुर् यथा स्वानो अर्त त्मना दिवः ॥ ५ ०२५ ०८
एवाँ अग्निं वसूयवः सहसानं ववन्दिम ।
स नो विश्वा अति द्विषः पर्षन् नावेव सुक्रतुः ॥ ५ ०२५ ०९

(३८०)
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।
आ देवान् वक्षि यक्षि च ॥ ५ ०२६ ०१
तं त्वा घृतस्नव् ईमहे चित्रभानो स्वर्दृशम् ।
देवाँ आ वीतये वह ॥ ५ ०२६ ०२
वीतिहोत्रं त्वा कवे द्युमन्तं सम् इधीमहि ।
अग्ने बृहन्तम् अध्वरे ॥ ५ ०२६ ०३
अग्ने विश्वेभिर् आ गहि देवेभिर् हव्यदातये ।
होतारं त्वा वृणीमहे ॥ ५ ०२६ ०४
यजमानाय सुन्वत आग्ने सुवीर्यं वह ।
देवैर् आ सत्सि बर्हिषि ॥ ५ ०२६ ०५
समिधानः सहस्रजिद् अग्ने धर्माणि पुष्यसि ।
देवानां दूत उक्थ्यः ॥ ५ ०२६ ०६
न्य् अ१ग्निं जातवेदसं होत्रवाहं यविष्ठ्यम् ।
दधाता देवम् ऋत्विजम् ॥ ५ ०२६ ०७
प्र यज्ञ एत्व् आनुषग् अद्या देवव्यचस्तमः ।
स्तृणीत बर्हिर् आसदे ॥ ५ ०२६ ०८
एदम् मरुतो अश्विना मित्रः सीदन्तु वरुणः ।
देवासः सर्वया विशा ॥ ५ ०२६ ०९

(३८१)

अनस्वन्ता सत्पतिर् मामहे मे गावा चेतिष्ठो असुरो मघोनः ।
त्रैवृष्णो अग्ने दशभिः सहस्रैर् वैश्वानर त्र्यरुणश् चिकेत ॥ ५ ०२७ ०१
यो मे शता च विंशतिं च गोनां हरी च युक्ता सुधुरा ददाति ।
वैश्वानर सुष्टुतो वावृधानो ऽग्ने यच्छ त्र्यरुणाय शर्म ॥ ५ ०२७ ०२
एवा ते अग्ने सुमतिं चकानो नविष्ठाय नवमं त्रसदस्युः ।
यो मे गिरस् तुविजातस्य पूर्वीर् युक्तेनाभि त्र्यरुणो गृणाति ॥ ५ ०२७ ०३
यो म इति प्रवोचत्य् अश्वमेधाय सूरये ।
ददद् ऋचा सनिं यते ददन् मेधाम् ऋतायते ॥ ५ ०२७ ०४
यस्य मा परुषाः शतम् उद्धर्षयन्त्य् उक्षणः ।
अश्वमेधस्य दानाः सोमा इव त्र्याशिरः ॥ ५ ०२७ ०५
इन्द्राग्नी शतदाव्न्य् अश्वमेधे सुवीर्यम् ।
क्षत्रं धारयतम् बृहद् दिवि सूर्यम् इवाजरम् ॥ ५ ०२७ ०६

(३८२)
समिद्धो अग्निर् दिवि शोचिर् अश्रेत् प्रत्यङ्ङ् उषसम् उर्विया वि भाति ।
एति प्राची विश्ववारा नमोभिर् देवाँ ईळाना हविषा घृताची ॥ ५ ०२८ ०१
समिध्यमानो अमृतस्य राजसि हविष् कृण्वन्तं सचसे स्वस्तये ।
विश्वं स धत्ते द्रविणं यम् इन्वस्य् आतिथ्यम् अग्ने नि च धत्त इत् पुरः ॥ ५ ०२८ ०२
अग्ने शर्ध महते सौभगाय तव द्युम्नान्य् उत्तमानि सन्तु ।
सं जास्पत्यं सुयमम् आ कृणुष्व शत्रूयताम् अभि तिष्ठा महांसि ॥ ५ ०२८ ०३
समिद्धस्य प्रमहसो ऽग्ने वन्दे तव श्रियम् ।
वृषभो द्युम्नवाँ असि सम् अध्वरेष्व् इध्यसे ॥ ५ ०२८ ०४
समिद्धो अग्न आहुत देवान् यक्षि स्वध्वर ।
त्वं हि हव्यवाळ् असि ॥ ५ ०२८ ०५
आ जुहोता दुवस्यताग्निम् प्रयत्य् अध्वरे ।
वृणीध्वं हव्यवाहनम् ॥ ५ ०२८ ०६

(३८३)
त्र्य् अर्यमा मनुषो देवताता त्री रोचना दिव्या धारयन्त ।
अर्चन्ति त्वा मरुतः पूतदक्षास् त्वम् एषाम् ऋषिर् इन्द्रासि धीरः ॥ ५ ०२९ ०१
अनु यद् ईम् मरुतो मन्दसानम् आर्चन्न् इन्द्रम् पपिवांसं सुतस्य ।
आदत्त वज्रम् अभि यद् अहिं हन्न् अपो यह्वीर् असृजत् सर्तवा उ ॥ ५ ०२९ ०२
उत ब्रह्माणो मरुतो मे अस्येन्द्रः सोमस्य सुषुतस्य पेयाः ।
तद् धि हव्यम् मनुषे गा अविन्दद् अहन्न् अहिम् पपिवाँ इन्द्रो अस्य ॥ ५ ०२९ ०३
आद् रोदसी वितरं वि ष्कभायत् संविव्यानश् चिद् भियसे मृगं कः ।
जिगर्तिम् इन्द्रो अपजर्गुराणः प्रति श्वसन्तम् अव दानवं हन् ॥ ५ ०२९ ०४
अध क्रत्वा मघवन् तुभ्यं देवा अनु विश्वे अददुः सोमपेयम् ।
यत् सूर्यस्य हरितः पतन्तीः पुरः सतीर् उपरा एतशे कः ॥ ५ ०२९ ०५
नव यद् अस्य नवतिं च भोगान् साकं वज्रेण मघवा विवृश्चत् ।
अर्चन्तीन्द्रम् मरुतः सधस्थे त्रैष्टुभेन वचसा बाधत द्याम् ॥ ५ ०२९ ०६
सखा सख्ये अपचत् तूयम् अग्निर् अस्य क्रत्वा महिषा त्री शतानि ।
त्री साकम् इन्द्रो मनुषः सरांसि सुतम् पिबद् वृत्रहत्याय सोमम् ॥ ५ ०२९ ०७
त्री यच् छता महिषाणाम् अघो मास् त्री सरांसि मघवा सोम्यापाः ।
कारं न विश्वे अह्वन्त देवा भरम् इन्द्राय यद् अहिं जघान ॥ ५ ०२९ ०८
उशना यत् सहस्याइर् अयातं गृहम् इन्द्र जूजुवानेभिर् अश्वैः ।
वन्वानो अत्र सरथं ययाथ कुत्सेन देवैर् अवनोर् ह शुष्णम् ॥ ५ ०२९ ०९
प्रान्यच् चक्रम् अवृहः सूर्यस्य कुत्सायान्यद् वरिवो यातवे ऽकः ।
अनासो दस्यूँर् अमृणो वधेन नि दुर्योण आवृणङ् मृध्रवाचः ॥ ५ ०२९ १०
स्तोमासस् त्वा गौरिवीतेर् अवर्धन्न् अरन्धयो वैदथिनाय पिप्रुम् ।
आ त्वाम् ऋजिश्वा सख्याय चक्रे पचन् पक्तीर् अपिबः सोमम् अस्य ॥ ५ ०२९ ११
नवग्वासः सुतसोमास इन्द्रं दशग्वासो अभ्य् अर्चन्त्य् अर्कैः ।
गव्यं चिद् ऊर्वम् अपिधानवन्तं तं चिन् नरः शशमाना अप व्रन् ॥ ५ ०२९ १२
कथो नु ते परि चराणि विद्वान् वीर्या मघवन् या चकर्थ ।
या चो नु नव्या कृणवः शविष्ठ प्रेद् उ ता ते विदथेषु ब्रवाम ॥ ५ ०२९ १३

ए॒ता विश्वा॑ चकृ॒वाँ इ॑न्द्र॒ भूर्य् अप॑रीतो ज॒नुषा॑ वी॒र्ये॑ण ।
या चि॒न् नु व॑ज्रिन् कृ॒णवो॑ दधृ॒ष्वान् न ते॑ व॒र्ता तवि॑ष्या अस्ति॒ तस्याः॑ ॥ ५ ०२९ १४
इन्द्र॒ ब्रह्म॑ क्रि॒यमा॑णा जुषस्व॒ या ते॑ शविष्ठ॒ नव्या॒ अक॑र्म ।
वस्त्रे॑व भ॒द्रा सुकृ॑ता वसू॒यू रथं॒ न धीरः॒ स्वपा॑ अतक्षम् ॥ ५ ०२९ १५

(३८४)
क्व१॒॑ स्य वी॒रः को अ॑पश्य॒द् इन्द्रं॑ सु॒खर॑थ॒म् ईय॑मानं॒ हरि॑भ्याम् ।
यो रा॒या व॒ज्री सु॒तसो॑मम् इ॒च्छन् तद् ओको॒ गन्ता॑ पुरुहू॒त ऊ॒ती ॥ ५ ०३० ०१
अवा॑चचक्षम् प॒दम् अ॑स्य स॒स्वर् उ॒ग्रं नि॑धा॒तुर् अन्व् आ॑यम् इ॒च्छन् ।
अपृ॑च्छम् अ॒न्याँ उ॒त ते म॑ आहु॒र् इन्द्रं॑ नरो॑ बुबुधा॒ना अ॑शेम ॥ ५ ०३० ०२
प्र नु व॒यं सु॒ते या ते॑ कृ॒तानीन्द्र॒ ब्रवा॑म॒ यानि॑ नो॒ जुजो॑षः ।
वेद॒द् अवि॑द्वाञ् छृ॒णव॑च् च वि॒द्वान् वह॑ते॒ ऽयम् म॒घवा॒ सर्व॑सेनः ॥ ५ ०३० ०३
स्थि॒रम् मन॑श् चकृषे जा॒त इ॑न्द्र॒ वेषी॒द् एको॑ यु॒धये॒ भूय॑सश् चित् ।
अश्मा॑नं चि॒च् छव॑सा दिद्यु॒तो वि वि॒दो गवा॑म् ऊ॒र्वम् उ॒स्रिया॑णाम् ॥ ५ ०३० ०४
प॒रो यत् त्वम् प॑र॒म आ॒जनि॑ष्ठाः परा॒वति॒ श्रुत्यं॒ नाम॒ बिभ्र॑त् ।
अत॑श् चि॒द् इन्द्रा॑द् अभयन्त दे॒वा विश्वा॑ अ॒पो अ॑जयद् दा॒सप॑त्नीः ॥ ५ ०३० ०५
तुभ्येद् ए॒ते म॒रुतः॑ सु॒शेवा॒ अर्च॑न्त्य् अ॒र्कं सु॒न्वन्त्य् अन्धः॑ ।
अहि॑म् ओहा॒नम् अ॒प आ॒शया॑न॒म् प्र मा॒याभि॑र् मा॒यिनं॑ सक्ष॒द् इन्द्रः॑ ॥ ५ ०३० ०६
वि षू मृधो॑ ज॒नुषा॑ दा॒नम् इन्व॒न्न् अह॒न् गवा॑ मघवन् संचका॒नः ।
अत्रा॑ दा॒सस्य॒ नमु॑चेः॒ शिरो॒ यद् अव॑र्तयो॒ मन॑वे गा॒तुम् इ॒च्छन् ॥ ५ ०३० ०७
यु॒जं हि माम् अकृ॑था॒ आद् इद् इ॑न्द्र॒ शिरो॑ दा॒सस्य॒ नमु॑चेर् मथा॒यन् ।
अश्मा॑नं चित् स्व॒र्य१॒॑ं वर्त॑मान॒म् प्र च॒क्रिये॑व॒ रोद॑सी म॒रुद्भ्यः॑ ॥ ५ ०३० ०८
स्त्रियो॒ हि दा॒स आयु॑धानि च॒क्रे किम् मा॑ करन्न् अब॒ला अ॑स्य॒ सेनाः॑ ।
अ॒न्तर् ह्य॒ अख्य॑द् उ॒भे अ॑स्य॒ धेने॒ अथोप॒ प्रैद् यु॒धये॒ दस्यु॒म् इन्द्रः॑ ॥ ५ ०३० ०९
सम् अत्र॒ गावो॑ ऽभितो॑ ऽनवन्ते॒हेह॑ व॒त्सैर् वियु॑ता॒ यद् आस॑न् ।
सं ता इन्द्रो॑ असृजद् अस्य शा॒कैर् यद् ई॒ं सोमा॑सः॒ सुषु॑ता॒ अम॑न्दन् ॥ ५ ०३० १०
यद् ई॒ं सोमा॑ ब॒भ्रुधू॑ता॒ अम॑न्दन्न् अरो॑रवीद् वृष॒भः साद॑नेषु ।

पुरंदरः पपिवाँ इन्द्रो अस्य पुनर् गवाम् अददाद् उस्रियाणाम् ॥ ५ ०३० ११
भद्रम् इदं रुशमा अग्ने अक्रन् गवां चत्वारि ददतः सहस्रा ।
ऋणंचयस्य प्रयता मघानि प्रत्य् अग्रभीष्म नृतमस्य नृणाम् ॥ ५ ०३० १२
सुपेशसम् माव सृजन्त्य् अस्तं गवां सहस्रै रुशमासो अग्ने ।
तीव्रा इन्द्रम् अममन्दुः सुतासो ऽक्तोर् व्युष्टौ परितक्म्यायाः ॥ ५ ०३० १३
औच्छत् सा रात्री परितक्म्या याँ ऋणंचये राजनि रुशमानाम् ।
अत्यो न वाजी रघुर् अज्यमानो बभ्रुश् चत्वार्य् असनत् सहस्रा ॥ ५ ०३० १४
चतुःसहस्रं गव्यस्य पश्वः प्रत्य् अग्रभीष्म रुशमेष्व् अग्ने ।
घर्मश् चित् तप्तः प्रवृजे य आसीद् अयस्मयस् तं व् आदाम विप्राः ॥ ५ ०३० १५

(३८५)
इन्द्रो रथाय प्रवतं कृणोति यम् अध्यस्थान् मघवा वाजयन्तम् ।
यूथेव पश्वो व्य् उनोति गोपा अरिष्टो याति प्रथमः सिषासन् ॥ ५ ०३१ ०१
आ प्र द्रव हरिवो मा वि वेनः पिशङ्गराते अभि नः सचस्व ।
नहि त्वद् इन्द्र वस्यो अन्यद् अस्त्य् अमेनांश् चिज् जनिवतश् चकर्थ ॥ ५ ०३१ ०२
उद् यत् सहः सहस आजनिष्ट देदिष्ट इन्द्र इन्द्रियाणि विश्वा ।
प्राचोदयत् सुदुघा वव्रे अन्तर् वि ज्योतिषा संववृत्वत् तमो ऽवः ॥ ५ ०३१ ०३
अनवस् ते रथम् अश्वाय तक्षन् त्वष्टा वज्रम् पुरुहूत द्युमन्तम् ।
ब्रह्माण इन्द्रम् महयन्तो अर्कैर् अवर्धयन्न् अहये हन्तवा उ ॥ ५ ०३१ ०४
वृष्णे यत् ते वृषणो अर्कम् अर्चान् इन्द्र ग्रावाणो अदितिः सजोषाः ।
अनश्वासो ये पवयो ऽरथा इन्द्रेषिता अभ्य् अवर्तन्त दस्यून् ॥ ५ ०३१ ०५
प्र ते पूर्वाणि करणानि वोचम् प्र नूतना मघवन् या चकर्थ ।
शक्तीवो यद् विभरा रोदसी उभे जयन्न् अपो मनवे दानुचित्राः ॥ ५ ०३१ ०६
तद् इन् नु ते करणं दस्म विप्राहिं यद् घ्नन्न् ओजो अत्रामिमीथाः ।
शुष्णस्य चित् परि माया अगृभ्णाः प्रपित्वं यन्न् अप दस्यूँर् असेधः ॥ ५ ०३१ ०७
त्वम् अपो यदवे तुर्वशायारमयः सुदुघाः पार इन्द्र ।
उग्रम् अयातम् अवहो ह कुत्सं सं ह यद् वाम् उशनारन्त देवाः ॥ ५ ०३१ ०८

इन्द्राकुत्सा वहमाना रथेना वाम् अत्या अपि कर्णे वहन्तु ।
निः षीम् अद्भ्यो धमथो निः षधस्थान् मघोनो हृदो वरथस् तमांसि ॥ ५ ०३१ ०९
वातस्य युक्तान् सुयुजश् चिद् अश्वान् कविश् चिद् एषो अजगन्न् अवस्युः ।
विश्वे ते अत्र मरुतः सखाय इन्द्र ब्रह्माणि तविषीम् अवर्धन् ॥ ५ ०३१ १०
सूरश् चिद् रथम् परितक्म्यायाम् पूर्वं करद् उपरं जूजुवांसम् ।
भरच् चक्रम् एतशः सं रिणाति पुरो दधत् सनिष्यति क्रतुं नः ॥ ५ ०३१ ११
आयं जना अभिचक्षे जगामेन्द्रः सखायं सुतसोमम् इच्छन् ।
वदन् ग्रावाव वेदिम् भ्रियाते यस्य जीरम् अध्वर्यवश् चरन्ति ॥ ५ ०३१ १२
ये चाकनन्त चाकनन्त नू ते मर्ता अमृत मो ते अंह आरन् ।
वावन्धि यज्यूꣳर् उत तेषु धेह्य ओजो जनेषु येषु ते स्याम ॥ ५ ०३१ १३

(३८६)
अदर्दर् उत्सम् असृजो वि खानि त्वम् अर्णवान् बद्बधानाꣳ अरम्णाः ।
महान्तम् इन्द्र पर्वतं वि यद् वः सृजो वि धारा अव दानवं हन् ॥ ५ ०३२ ०१
त्वम् उत्साꣳ ऋतुभिर् बद्बधानाꣳ अरंह ऊधः पर्वतस्य वज्रिन् ।
अहिं चिद् उग्र प्रयुतं शयानं जघन्वाꣳ इन्द्र तविषीम् अधत्थाः ॥ ५ ०३२ ०२
त्यस्य चिन् महतो निर् मृगस्य वधर् जघान तविषीभिर् इन्द्रः ।
य एक इद् अप्रतिर् मन्यमान आद् अस्माद् अन्यो अजनिष्ट तव्यान् ॥ ५ ०३२ ०३
त्यं चिद् एषां स्वधया मदन्तम् मिहो नपातं सुवृधं तमोगाम् ।
वृषप्रभर्मा दानवस्य भामं वज्रेण वज्री नि जघान शुष्णम् ॥ ५ ०३२ ०४
त्यं चिद् अस्य क्रतुभिर् निषत्तम् अमर्मणो विदद् इद् अस्य मर्म ।
यद् ईं सुक्षत्र प्रभृता मदस्य युयुत्सन्तं तमसि हर्म्ये धाः ॥ ५ ०३२ ०५
त्यं चिद् इत्था कत्पयं शयानम् असूर्ये तमसि वावृधानम् ।
तं चिन् मन्दानो वृषभः सुतस्योच्चैर् इन्द्रो अपगूर्या जघान ॥ ५ ०३२ ०६
उद् यद् इन्द्रो महते दानवाय वधर् यमिष्ट सहो अप्रतीतम् ।
यद् ईं वज्रस्य प्रभृतौ ददाभ विश्वस्य जन्तोर् अधमं चकार ॥ ५ ०३२ ०७
त्यं चिद् अर्णम् मधुपं शयानम् असिन्वं वव्रम् मह्य आदद् उग्रः ।

अपादम् अत्रम् महता वधेन नि दुर्योण आवृणङ् मृध्रवाचम् ॥ ५ ०३२ ०८
को अस्य शुष्मं तविषीं वरात एको धना भरते अप्रतीतः ।
इमे चिद् अस्य ज्रयसो नु देवी इन्द्रस्यौजसो भियसा जिहाते ॥ ५ ०३२ ०९
न्य् अस्मै देवी स्वधितिर् जिहीत इन्द्राय गातुर् उशतीव येमे ।
सं यद् ओजो युवते विश्वम् आभिर् अनु स्वधाव्ने क्षितयो नमन्त ॥ ५ ०३२ १०
एकं नु त्वा सत्पतिम् पाञ्चजन्यं जातं शृणोमि यशसं जनेषु ।
तम् मे जगृभ्र आशसो नविष्ठं दोषा वस्तोर् हवमानास इन्द्रम् ॥ ५ ०३२ ११
एवा हि त्वाम् ऋतुथा यातयन्तम् मघा विप्रेभ्यो ददतं शृणोमि ।
किं ते ब्रह्माणो गृहते सखायो ये त्वाया निदधुः कामम् इन्द्र ॥ ५ ०३२ १२

(३८७)
महि महे तवसे दीध्ये नॄन् इन्द्रायेत्था तवसे अतव्यान् ।
यो अस्मै सुमतिं वाजसातौ स्तुतो जने समर्यश् चिकेत ॥ ५ ०३३ ०१
स त्वं न इन्द्र धियसानो अर्कैर् हरीणां वृषन् योक्त्रम् अश्रेः ।
या इत्था मघवन्न् अनु जोषं वक्षो अभि प्रार्यः सक्षि जनान् ॥ ५ ०३३ ०२
न ते त इन्द्राभ्य् अ १ स्मद् ऋष्वायुक्तासो अब्रह्मता यद् असन् ।
तिष्ठा रथम् अधि तं वज्रहस्ता रश्मिं देव यमसे स्वश्वः ॥ ५ ०३३ ०३
पुरू यत् त इन्द्र सन्त्य् उक्था गवे चकर्थोर्वरासु युध्यन् ।
ततक्षे सूर्याय चिद् ओकसि स्वे वृषा समत्सु दासस्य नाम चित् ॥ ५ ०३३ ०४
वयं ते त इन्द्र ये च नरः शर्धो जज्ञाना याताश् च रथाः ।
आस्माञ् जगम्याद् अहिशुष्म सत्वा भगो न हव्यः प्रभृथेषु चारुः ॥ ५ ०३३ ०५
पपृक्षेण्यम् इन्द्र त्वे ह्य् ओजो नृम्णानि च नृतमानो अमर्तः ।
स न एनीं वसवानो रयिं दाः प्रार्य स्तुषे तुविमघस्य दानम् ॥ ५ ०३३ ०६
एवा न इन्द्रोतिभिर् अव पाहि गृणतः शूर कारून् ।
उत त्वचं ददतो वाजसातौ पिप्रीहि मध्वः सुषुतस्य चारोः ॥ ५ ०३३ ०७
उत त्ये मा पौरुकुत्स्यस्य सूरेस् त्रसदस्योर् हिरणिनो रराणाः ।
वहन्तु मा दश श्येतासो अस्य गैरिक्षितस्य क्रतुभिर् नु सश्चे ॥ ५ ०३३ ०८

उत त्ये मा मारुताश्वस्य शोणाः क्रत्वामघासो विदथस्य रातौ ।
सहस्रा मे च्यवतानो ददान आनूकम् अर्यो वपुषे नार्चत् ॥ ५ ०३३ ०९
उत त्ये मा ध्वन्यस्य जुष्टा लक्ष्मण्यस्य सुरुचो यतानाः ।
मह्ना रायः संवरणस्य ऋषेर् व्रजं न गावः प्रयता अपि ग्मन् ॥ ५ ०३३ १०

(३८८)
अजातशत्रुम् अजरा स्वर्वत्य् अनु स्वधामिता दस्मम् ईयते ।
सुनोतन पचत ब्रह्मवाहसे पुरुष्टुताय प्रतरं दधातन ॥ ५ ०३४ ०१
आ यः सोमेन जठरम् अपिप्रतामन्दत मघवा मध्वो अन्धसः ।
यद् ईम् मृगाय हन्तवे महावधः सहस्रभृष्टिम् उशना वधं यमत् ॥ ५ ०३४ ०२
यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह ।
अपाप शक्रस् ततनुष्टिम् ऊहति तनूशुभ्रम् मघवा यः कवासखः ॥ ५ ०३४ ०३
यस्यावधीत् पितरं यस्य मातरं यस्य शक्रो भ्रातरं नात ईषते ।
वेतीद् व् अस्य प्रयता यतंकरो न किल्बिषाद् ईषते वस्व आकरः ॥ ५ ०३४ ०४
न पञ्चभिर् दशभिर् वष्ट्य् आरभं नासुन्वता सचते पुष्यता चन ।
जिनाति वेद् अमुया हन्ति वा धुनिर् आ देवयुम् भजति गोमति व्रजे ॥ ५ ०३४ ०५
वित्वक्षणः समृतौ चक्रमासजो ऽसुन्वतो विषुणः सुन्वतो वृधः ।
इन्द्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासम् आर्यः ॥ ५ ०३४ ०६
सम् ईम् पणेर् अजति भोजनम् मुषे वि दाशुषे भजति सूनरं वसु ।
दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीम् अचुक्रुधत् ॥ ५ ०३४ ०७
सं यज् जनौ सुधनौ विश्वशर्धसाव् अवेद् इन्द्रो मघवा गोषु शुभ्रिषु ।
युजं ह्य् अ१न्यम् अकृत प्रवेपन्य् उद् ईं गव्यं सृजते सत्वभिर् धुनिः ॥ ५ ०३४ ०८
सहस्रसाम् आग्निवेशिं गृणीषे शत्रिम् अग्न उपमां केतुम् अर्यः ।
तस्मा आपः संयतः पीपयन्त तस्मिन् क्षत्रम् अमवत् त्वेषम् अस्तु ॥ ५ ०३४ ०९

(३८९)

यस् ते साधिष्ठो ऽवस इन्द्र क्रतुष् टम् आ भर ।
अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरम् ॥ ५ ०३५ ०१
यद् इन्द्र ते चतस्रो यच् छूर सन्ति तिस्रः ।
यद् वा पञ्च क्षितीनाम् अवस् तत् सु न आ भर ॥ ५ ०३५ ०२
आ ते ऽवो वरेण्यं वृषन्तमस्य हूमहे ।
वृषजूतिर् हि जज्ञिष आभूभिर् इन्द्र तुर्वणिः ॥ ५ ०३५ ०३
वृषा ह्य् असि राधसे जज्ञिषे वृष्णि ते शवः ।
स्वक्षत्रं ते धृषन् मनः सत्राहम् इन्द्र पौंस्यम् ॥ ५ ०३५ ०४
त्वं तम् इन्द्र मर्त्यम् अमित्रयन्तम् अद्रिवः ।
सर्वरथा शतक्रतो नि याहि शवसस् पते ॥ ५ ०३५ ०५
त्वाम् इद् वृत्रहन्तम जनासो वृक्तबर्हिषः ।
उग्रम् पूर्वीषु पूर्व्यं हवन्ते वाजसातये ॥ ५ ०३५ ०६
अस्माकम् इन्द्र दुष्टरम् पुरोयावानम् आजिषु ।
सयावानं धने-धने वाजयन्तम् अवा रथम् ॥ ५ ०३५ ०७
अस्माकम् इन्द्रेहि नो रथम् अवा पुरंध्या ।
वयं शविष्ठ वार्यं दिवि श्रवो दधीमहि दिवि स्तोमम् मनामहे ॥ ५ ०३५ ०८

(३९०)
स आ गमद् इन्द्रो यो वसूनां चिकेतद् दातुं दामनो रयीणाम् ।
धन्वचरो न वंसगस् तृषाणश् चकमानः पिबतु दुग्धम् अंशुम् ॥ ५ ०३६ ०१
आ ते हनू हरिवः शूर शिप्रे रुहत् सोमो न पर्वतस्य पृष्ठे ।
अनु त्वा राजन्न् अर्वतो न हिन्वन् गीर्भिर् मदेम पुरुहूत विश्वे ॥ ५ ०३६ ०२
चक्रं न वृत्तम् पुरुहूत वेपते मनो भिया मे अमतेर् इद् अद्रिवः ।
रथाद् अधि त्वा जरिता सदावृध कुविन् नु स्तोषन् मघवन् पुरूवसुः ॥ ५ ०३६ ०३
एष ग्रावेव जरिता त इन्द्रेयर्ति वाचम् बृहद् आशुषाणः ।
प्र सव्येन मघवन् यंसि रायः प्र दक्षिणिद् धरिवो मा वि वेनः ॥ ५ ०३६ ०४
वृषा त्वा वृषणं वर्धतु द्यौर् वृषा वृषभ्यां वहसे हरिभ्याम् ।

स नो॒ वृषा॒ वृष॑रथः सुशिप्र वृष॑क्रतो॒ वृषा॑ वज्रिन् भरे॑ धाः ॥ ५ ०३६ ०५
यो रोहि॑तौ वा॒जिनौ॑ वा॒जिनी॑वान् त्रि॒भिः श॒तैः सच॑माना॒व् अदि॑ष्ट ।
यूने॒ सम् अ॑स्मै क्षि॒तयो॑ नमन्तां श्रु॒तर॑थाय मरुतो दुवो॒या ॥ ५ ०३६ ०६

(३९१)
सम् भा॒नुना॑ यतते॒ सूर्य॑स्या॒जुह्वा॑नो घृ॒तपृ॑ष्ठः॒ स्वञ्चाः॑ ।
तस्मा॒ अमृ॑ध्रा उ॒षसो॒ व्य् उच्छा॒न् य इन्द्रा॑य सु॒नवा॒मेत्य् आह॑ ॥ ५ ०३७ ०१
समि॑द्धाग्निर् वनवत् स्ती॒र्णब॑र्हिर् यु॒क्तग्रा॑वा सु॒तसो॑मो जराते ।
ग्रावा॑णो॒ यस्ये॑षि॒रं व॒दन्त्य् अय॑द् अध्व॒र्युर् ह॒विषाव॒ सिन्धु॑म् ॥ ५ ०३७ ०२
व॒धूर् इ॒यम् पति॑म् इ॒च्छन्त्य् ए॑ति॒ य ई॒ वहा॑ति॒ महि॑षीम् इषि॒राम् ।
आस्य॑ श्रवस्या॒द् रथ॒ आ च॑ घोषात् पु॒रू स॒हस्रा॒ परि॑ वर्तयाते ॥ ५ ०३७ ०३
न स राजा॑ व्यथते॒ यस्मि॒न्न् इन्द्र॑स् ती॒व्रं सोम॒म् पिब॑ति॒ गोस॑खायम् ।
आ स॑त्व॒नैर् अज॑ति॒ हन्ति॑ वृ॒त्रं क्षेति॑ क्षि॒तीः सु॒भगो॒ नाम॒ पुष्य॑न् ॥ ५ ०३७ ०४
पुष्या॒त् क्षेमे॑ अ॒भि योगे॑ भवात्य् उ॒भे वृतौ॑ संय॒ती सं ज॑याति ।
प्रि॒यः सूर्ये॑ प्रि॒यो अ॒ग्ना भ॑वाति॒ य इन्द्रा॑य सु॒तसो॑मो॒ ददा॑शत् ॥ ५ ०३७ ०५

(३९२)
उ॒रोष् ट॑ इन्द्र॒ राध॑सो वि॒भ्वी रा॒तिः श॑तक्रतो ।
अधा॑ नो विश्वचर्षणे द्यु॒म्ना सु॑क्षत्र मंहय ॥ ५ ०३८ ०१
यद् ई॑म् इन्द्र श्र॒वाय्य॒म् इषं॑ शविष्ठ दधि॒षे ।
प॒प्र॒थे दी॒र्घश्रुत्त॑मं॒ हिर॑ण्यवर्ण दु॒ष्टर॑म् ॥ ५ ०३८ ०२
शुष्मा॑सो॒ ये ते॑ अद्रिवो मे॒हना॑ केत॒साप॑ः ।
उ॒भा दे॒वाव् अ॒भिष्ट॑ये दि॒वश् च॒ ग्मश् च॑ राजथः ॥ ५ ०३८ ०३
उ॒तो नो॑ अ॒स्य कस्य॑ चि॒द् दक्ष॑स्य॒ तव॑ वृत्रहन् ।
अ॒स्मभ्यं॑ नृ॒म्णम् आ भ॑रा॒स्मभ्यं॑ नृमणस्यसे ॥ ५ ०३८ ०४
नू त॑ आ॒भिर् अ॒भिष्टि॑भि॒स् तव॒ शर्मं॑स् छतक्रतो ।

इन्द्र॒ स्याम॑ सुगो॒पाः शूर॒ स्याम॑ सुगो॒पाः ॥ ५ ०३८ ०५

(३९३)
यद् इ॑न्द्र चित्र मे॒हनास्ति॒ त्वादा॑तम् अद्रिवः ।
रा॒धस् तन् नो॑ विदद्वस उभयाह॒स्त्य् आ भ॑र ॥ ५ ०३९ ०१
यन् मन्य॑से॒ वरे॑ण्य॒म् इन्द्र॑ द्यु॒क्षं तद् आ भ॑र ।
वि॒द्या॒म तस्य॑ ते व॒यम् अकू॑पारस्य दा॒वने॑ ॥ ५ ०३९ ०२
यत् ते॑ दि॒त्सु प्र॒राध्य॒म् मनो॒ अस्ति॑ श्रु॒तम् बृ॒हत् ।
तेन॑ दृ॒ळ्हा चि॑द् अद्रिव॒ आ वाजं॑ दर्षि सा॒तये॑ ॥ ५ ०३९ ०३
मंहि॑ष्ठं वो म॒घोनां॒ राजा॑नं चर्षणी॒नाम् ।
इन्द्र॒म् उप॒ प्रश॑स्तये पू॒र्वीभि॑र् जुजु॒षे गिरः॑ ॥ ५ ०३९ ०४
अस्मा॒ इत् काव्यं॑ वच॑ उ॒क्थम् इन्द्रा॑य॒ शंस्य॑म् ।
तस्मा॑ उ॒ ब्रह्म॑वाह॒से गिरो॑ व॒र्धन्त्य् अत्र॑यो॒ गिरः॑ शुम्भ॒न्त्य् अत्र॑यः ॥ ५ ०३९ ०५

(३९४)
आ या॒ह्य् अद्रि॑भिः सु॒तं सोमं॑ सोमपते पिब ।
वृष॑न्न् इन्द्र॒ वृष॑भिर् वृत्रहन्तम ॥ ५ ०४० ०१
वृषा॒ ग्रावा॒ वृषा॒ मदो॒ वृषा॒ सोमो॑ अ॒यं सु॒तः ।
वृष॑न्न् इन्द्र॒ वृष॑भिर् वृत्रहन्तम ॥ ५ ०४० ०२
वृषा॑ त्वा॒ वृष॑णं हु॒वे वज्रि॑ञ् चि॒त्राभि॑र् ऊ॒तिभिः॑ ।
वृष॑न्न् इन्द्र॒ वृष॑भिर् वृत्रहन्तम ॥ ५ ०४० ०३
ऋ॒जीषी व॒ज्री वृ॑ष॒भस् तु॑रा॒षाट् छु॒ष्मी राजा॑ वृ॒त्रहा सोम॑पावा ।
यु॒क्त्वा हरि॑भ्या॒म् उप॑ यासद् अ॒र्वाङ् माध्यं॑दिने॒ सव॑ने मत्स॒द् इन्द्रः॑ ॥ ५ ०४० ०४
यत् त्वा॑ सूर्य॒ स्वर्भानु॒स् तम॒सावि॑ध्यद् आसु॒रः ।
अक्षे॑त्रविद् यथा॑ मु॒ग्धो भुव॑नान्य् अदीधयुः ॥ ५ ०४० ०५
स्वर्भा॒नो॒र् अध॒ यद् इ॑न्द्र मा॒या अ॒वो दि॒वो वर्त॑माना अ॒वाह॑न् ।

गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविन्दद् अत्रिः ॥ ५ ०४० ०६
मा माम् इमं तव सन्तम् अत्र इरस्या द्रुग्धो भियसा नि गारीत् ।
त्वम् मित्रो असि सत्यराधास् तौ मेहावतं वरुणश् च राजा ॥ ५ ०४० ०७
ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान् नमसोपशिक्षन् ।
अत्रिः सूर्यस्य दिवि चक्षुर् आधात् स्वर्भानोर् अप माया अघुक्षत् ॥ ५ ०४० ०८
यं वै सूर्यं स्वर्भानुस् तमसाविध्यद् आसुरः ।
अत्रयस् तम् अन्व् अविन्दन् नह्य् अ१न्ये अशक्नुवन् ॥ ५ ०४० ०९

(३९५)
को नु वाम् मित्रावरुणाव् ऋतायन् दिवो वा महः पार्थिवस्य वा दे ।
ऋतस्य वा सदसि त्रासीथां नो यज्ञायते वा पशुषो न वाजान् ॥ ५ ०४१ ०१
ते नो मित्रो वरुणो अर्यमायुर् इन्द्र ऋभुक्षा मरुतो जुषन्त ।
नमोभिर् वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हुषे सजोषाः ॥ ५ ०४१ ०२
आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन् रथ्यस्य पुष्टौ ।
उत वा दिवो असुराय मन्म प्रान्धांसीव यज्यवे भरध्वम् ॥ ५ ०४१ ०३
प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः ।
पूषा भगः प्रभृथे विश्वभोजा आजिं न जग्मुर् आश्वश्वतमाः ॥ ५ ०४१ ०४
प्र वो रयिं युक्ताश्वम् भरध्वं राय एषे ऽवसे दधीत धीः ।
सुशेव एवैर् औशिजस्य होता ये व एवा मरुतस् तुराणाम् ॥ ५ ०४१ ०५
प्र वो वायुं रथयुजं कृणुध्वम् प्र देवं विप्रम् पनितारम् अर्कैः ।
इषुध्यव ऋतसापः पुरंधीर् वस्वीर् नो अत्र पत्नीर् आ धिये धुः ॥ ५ ०४१ ०६
उप व एषे वन्द्येभिः शूषैः प्र यह्वी दिवश् चितयद्भिर् अर्कैः ।
उषासानक्ता विदुषीव विश्वम् आ हा वहतो मर्त्याय यज्ञम् ॥ ५ ०४१ ०७
अभि वो अर्चे पोष्यावतो नॄन् वास्तोष् पतिं त्वष्टारं रराणः ।
धन्या सजोषा धिषणा नमोभिर् वनस्पतीँर् ओषधी राय एषे ॥ ५ ०४१ ०८
तुजे नस् तने पर्वताः सन्तु स्वैतवो ये वसवो न वीराः ।
पनित आप्त्यो यजतः सदा नो वर्धान् नः शंसं नर्यो अभिष्टौ ॥ ५ ०४१ ०९

वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातम् अपां सुवृक्ति ।
गृणीते अग्निर् एतरी न शूषैः शोचिष्केशो नि रिणाति वना ॥ ५ ०४१ १०
कथा महे रुद्रियाय ब्रवाम कद् राये चिकितुषे भगाय ।
आप ओषधीर् उत नोऽवन्तु द्यौर् वना गिरयो वृक्षकेशाः ॥ ५ ०४१ ११
शृणोतु न ऊर्जाम् पतिर् गिरः स नभस् तरीयाँ इषिरः परिज्मा ।
शृण्वन्त्व् आपः पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः ॥ ५ ०४१ १२
विदा चिन् नु महान्तो ये व एवा ब्रवाम दस्मा वार्यं दधानाः ।
वयश् चन सुभ्व आव यन्ति क्षुभा मर्तम् अनुयतं वधस्नैः ॥ ५ ०४१ १३
आ दैव्यानि पार्थिवानि जन्मापश् चाच्छा सुमखाय वोचम् ।
वर्धन्तां द्यावो गिरश् चन्द्राग्रा उदा वर्धन्ताम् अभिषाता अर्णाः ॥ ५ ०४१ १४
पदे-पदे मे जरिमा नि धायि वरूत्री वा शक्रा या पायुभिश् च ।
सिषक्तु माता मही रसा नः स्मत् सूरिभिर् ऋजुहस्त ऋजुवनिः ॥ ५ ०४१ १५
कथा दाशेम नमसा सुदानून् एवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ ।
मा नोऽहिर् बुध्न्यो रिषे धाद् अस्माकम् भूद् उपमातिवनिः ॥ ५ ०४१ १६
इति चिन् नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ देवासो वनते मर्त्यो वः ।
अत्रा शिवां तन्वो धासिम् अस्या जरां चिन् मे निरृतिर् जग्रसीत ॥ ५ ०४१ १७
तां वो देवाः सुमतिम् ऊर्जयन्तीम् इषम् अश्याम वसवः शसा गोः ।
सा नः सुदानुर् मृळयन्ती देवी प्रति द्रवन्ती सुविताय गम्याः ॥ ५ ०४१ १८
अभि न इळा यूथस्य माता स्मन् नदीभिर् उर्वशी वा गृणातु ।
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः ॥ ५ ०४१ १९
सिषक्तु न ऊर्जव्यस्य पुष्टेः ।

(३९६)
प्र शंतमा वरुणं दीधिती गीर् मित्रम् भगम् अदितिं नूनम् अश्याः ।
पृषद्योनिः पञ्चहोता शृणोत्व् अतूर्तपन्था असुरो मयोभुः ॥ ५ ०४२ ०१
प्रति मे स्तोमम् अदितिर् जगृभ्यात् सूनुं न माता हृद्यं सुशेवम् ।
ब्रह्म प्रियं देवहितं यद् अस्त्य् अहम् मित्रे वरुणे यन् मयोभु ॥ ५ ०४२ ०२

उद् ईरय कवितमं कवीनाम् उनत्तैनम् अभि मध्वा घृतेन ।
स नो वसूनि प्रयता हितानि चन्द्राणि देवः सविता सुवाति ॥ ५ ०४२ ०३
सम् इन्द्र णो मनसा नेषि गोभिः सं सूरिभिर् हरिवः सं स्वस्ति ।
सम् ब्रह्मणा देवहितं यद् अस्ति सं देवानां सुमत्या यज्ञियानाम् ॥ ५ ०४२ ०४
देवो भगः सविता रायो अंश इन्द्रो वृत्रस्य संजितो धनानाम् ।
ऋभुक्षा वाज उत वा पुरंधिर् अवन्तु नो अमृतासस् तुरासः ॥ ५ ०४२ ०५
मरुत्वतो अप्रतीतस्य जिष्णोर् अजूर्यतः प्र ब्रवामा कृतानि ।
न ते पूर्वे मघवन् नापरासो न वीर्य १ं नूतनः कश् चनाप ॥ ५ ०४२ ०६
उप स्तुहि प्रथमं रत्नधेयम् बृहस्पतिं सनितारं धनानाम् ।
यः शंसते स्तुवते शम्भविष्ठः पुरूवसुर् आगमज् जोहुवानम् ॥ ५ ०४२ ०७
तवोतिभिः सचमाना अरिष्टा बृहस्पते मघवानः सुवीराः ।
ये अश्वदा उत वा सन्ति गोदा ये वस्त्रदाः सुभगास् तेषु रायः ॥ ५ ०४२ ०८
विसर्माणं कृणुहि वित्तम् एषां ये भुञ्जते अपृणन्तो न उक्थैः ।
अपव्रतान् प्रसवे वावृधानान् ब्रह्मद्विषः सूर्याद् यावयस्व ॥ ५ ०४२ ०९
य ओहते रक्षसो देववीताव् अचक्रेभिस् तम् मरुतो नि यात ।
यो वः शमीं शशमानस्य निन्दात् तुच्छ्यान् कामान् करते सिष्विदानः ॥ ५ ०४२ १०
तम् उ ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वा महे सौमनसाय रुद्रं नमोभिर् देवम् असुरं दुवस्य ॥ ५ ०४२ ११
दमूनसो अपसो ये सुहस्ता वृष्णः पत्नीर् नद्यो विभ्वतष्टाः ।
सरस्वती बृहद्दिवोत राका दशस्यन्तीर् वरिवस्यन्तु शुभ्राः ॥ ५ ०४२ १२
प्र सू महे सुशरणाय मेधां गिरम् भरे नव्यसीं जायमानाम् ।
य आहना दुहितुर् वक्षणासु रूपा मिनानो अकृणोद् इदं नः ॥ ५ ०४२ १३
प्र सुष्टुति स्तनयन्तं रुवन्तम् इळस् पतिं जरितर् नूनम् अश्याः ।
यो अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः ॥ ५ ०४२ १४
एष स्तोमो मारुतं शर्धो अच्छा रुद्रस्य सूनूँर् युवन्यूँर् उद् अश्याः ।
कामो राये हवते मा स्वस्त्य् उप स्तुहि पृषदश्वाँ अयासः ॥ ५ ०४२ १५
प्रैष स्तोमः पृथिवीम् अन्तरिक्षं वनस्पतीँर् ओषधी राये अश्याः ।
देवो-देवः सुहवो भूतु मह्यम् मा नो माता पृथिवी दुर्मतौ धात् ॥ ५ ०४२ १६

उरौ देवा अनिबाधे स्याम ।
सम् अश्विनोर् अवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतम् ओत वीरान् आ विश्वान्य् अमृता सौभगानि ॥ ५ ०४२ १८

(३९७)
आ धेनवः पयसा तूर्ण्यर्था अमर्धन्तीर् उप नो यन्तु मध्वा ।
महो राये बृहतीः सप्त विप्रो मयोभुवो जरिता जोहवीति ॥ ५ ०४३ ०१
आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे ।
पिता माता मधुवचाः सुहस्ता भरे-भरे नो यशसाव् अविष्टाम् ॥ ५ ०४३ ०२
अध्वर्यवश् चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रम् ।
होतेव नः प्रथमः पाह्य् अस्य देव मध्वो ररिमा ते मदाय ॥ ५ ०४३ ०३
दश क्षिपो युञ्जते बाहू अद्रिं सोमस्य या शमितारा सुहस्ता ।
मध्वो रसं सुगभस्तिर् गिरिष्ठां चनिश्चदद् दुदुहे शुक्रम् अंशुः ॥ ५ ०४३ ०४
असावि ते जुजुषाणाय सोमः क्रत्वे दक्षाय बृहते मदाय ।
हरी रथे सुधुरा योगे अर्वाग् इन्द्र प्रिया कृणुहि हूयमानः ॥ ५ ०४३ ०५
आ नो महीम् अरमतिं सजोषा ग्नां देवीं नमसा रातहव्याम् ।
मधोर् मदाय बृहतीम् ऋतज्ञाम् आग्ने वह पथिभिर् देवयानैः ॥ ५ ०४३ ०६
अञ्जन्ति यम् प्रथयन्तो न विप्रा वपावन्तं नाग्निना तपन्तः ।
पितुर् न पुत्र उपसि प्रेष्ठ आ घर्मो अग्निम् ऋतयन्न् असादि ॥ ५ ०४३ ०७
अच्छा मही बृहती शंतमा गीर् दूतो न गन्त्व् अश्विना हुवध्यै ।
मयोभुवा सरथा यातम् अर्वाग् गन्तं निधिं धुरम् आणिर् न नाभिम् ॥ ५ ०४३ ०८
प्र तव्यसो नमउक्तिं तुरस्याहम् पूष्ण उत वायोर् अदिक्षि ।
या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उत त्मन् ॥ ५ ०४३ ०९
आ नामभिर् मरुतो वक्षि विश्वान् आ रूपेभिर् जातवेदो हुवानः ।
यज्ञं गिरो जरितुः सुष्टुतिं च विश्वे गन्त मरुतो विश्व ऊती ॥ ५ ०४३ १०
आ नो दिवो बृहतः पर्वताद् आ सरस्वती यजता गन्तु यज्ञम् ।
हवं देवी जुजुषाणा घृताची शग्मां नो वाचम् उशती शृणोतु ॥ ५ ०४३ ११

आ वेधसं नीलपृष्ठम् बृहन्तम् बृहस्पतिं सदने सादयध्वम् ।
सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णम् अरुषं सपेम ॥ ५ ०४३ १२
आ धर्णसिर् बृहद्दिवो रराणो विश्वेभिर् गन्त्व् ओमभिर् हुवानः ।
ग्ना वसान ओषधीर् अमृध्रस् त्रिधातुशृङ्गो वृषभो वयोधाः ॥ ५ ०४३ १३
मातुष् पदे परमे शुक्र आयोर् विपन्यवो रास्पिरासो अग्मन् ।
सुशेव्यं नमसा रातहव्याः शिशुम् मृजन्त्य् आयवो न वासे ॥ ५ ०४३ १४
बृहद् वयो बृहते तुभ्यम् अग्ने धियाजुरो मिथुनासः सचन्त ।
देवो-देवः सुहवो भूतु मह्यम् मा नो माता पृथिवी दुर्मतौ धात् ॥ ५ ०४३ १५
उरौ देवा अनिबाधे स्याम ।
सम् अश्विनोर् अवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतम् ओत वीरान् आ विश्वान्य् अमृता सौभगानि ॥ ५ ०४३ १७

(३९८)
तम् प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिम् बर्हिषदं स्वर्विदम् ।
प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तम् अनु यासु वर्धसे ॥ ५ ०४४ ०१
श्रिये सुदृशीर् उपरस्य याः स्वर् विरोचमानः ककुभाम् अचोदते ।
सुगोपा असि न दभाय सुक्रतो परो मायाभिर् ऋत आस नाम ते ॥ ५ ०४४ ०२
अत्यं हविः सचते सच् च धातु चारिष्टगातुः स होता सहोभरिः ।
प्रसर्स्राणो अनु बर्हिर् वृषा शिशुर् मध्ये युवाजरो विस्रुहा हितः ॥ ५ ०४४ ०३
प्र व एते सुयुजो यामन्न् इष्टये नीचीर् अमुष्मै यम्य ऋतावृधः ।
सुयन्तुभिः सर्वशासैर् अभीशुभिः क्रिविर् नामानि प्रवणे मुषायति ॥ ५ ०४४ ०४
संजर्भुराणस् तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः ।
धारवाकेष्व् ऋजुगाथ शोभसे वर्धस्व पत्नीर् अभि जीवो अध्वरे ॥ ५ ०४४ ०५
यादृग् एव ददृशे तादृग् उच्यते सं छायया दधिरे सिध्रयाप्स्व् आ ।
महीम् अस्मभ्यम् उरुषाम् उरु ज्रयो बृहत् सुवीरम् अनपच्युतं सहः ॥ ५ ०४४ ०६
वेत्य् अग्रुर् जनिवान् वा अति स्पृधः समर्यता मनसा सूर्यः कविः ।
घ्रंसं रक्षन्तम् परि विश्वतो गयम् अस्माकं शर्म वनवत् स्वावसुः ॥ ५ ०४४ ०७

ज्यायांसम् अस्य यतुनस्य केतुन ऋषिस्वरं चरति यासु नाम ते ।
यादृश्मिन् धायि तम् अपस्यया विदद् य उ स्वयं वहते सो अरं करत् ॥ ५ ०४४ ०८
समुद्रम् आसाम् अव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्न् आयता ।
अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर् विद्यते पूतबन्धनी ॥ ५ ०४४ ०९
स हि क्षत्रस्य मनसस्य चित्तिभिर् एवावदस्य यजतस्य सध्रेः ।
अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिद् अर्ध्यम् ॥ ५ ०४४ १०
श्येन आसाम् अदितिः कक्ष्यो३ मदो विश्ववारस्य यजतस्य मायिनः ।
सम् अन्यम्-अन्यम् अर्थयन्त्य् एतवे विदुर् विषाणम् परिपानम् अन्ति ते ॥ ५ ०४४
११
सदापृणो यजतो वि द्विषो वधीद् बाहुवृक्तः श्रुतवित् तर्यो वः सचा ।
उभा स वरा प्रत्य् एति भाति च यद् ईं गणम् भजते सुप्रयावभिः ॥ ५ ०४४ १२
सुतम्भरो यजमानस्य सत्पतिर् विश्वासाम् ऊधः स धियाम् उदञ्चनः ।
भरद् धेनू रसवच् छिश्रिये पयो ऽनुब्रुवाणो अध्य् एति न स्वपन् ॥ ५ ०४४ १३
यो जागार तम् ऋचः कामयन्ते यो जागार तम् उ सामानि यन्ति ।
यो जागार तम् अयं सोम आह तवाहम् अस्मि सख्ये न्योकाः ॥ ५ ०४४ १४
अग्निर् जागार तम् ऋचः कामयन्ते ऽग्निर् जागार तम् उ सामानि यन्ति ।
अग्निर् जागार तम् अयं सोम आह तवाहम् अस्मि सख्ये न्योकाः ॥ ५ ०४४ १५

(३९९)
विदा दिवो विष्यन्न् अद्रिम् उक्थैर् आयत्या उषसो अर्चिनो गुः ।
अपावृत व्रजिनीर् उत् स्वर् गाद् वि दुरो मानुषीर् देव आवः ॥ ५ ०४५ ०१
वि सूर्यो अमतिं न श्रियं साद् ओर्वाद् गवाम् माता जानती गात् ।
धन्वर्णसो नद्य१ः खादोअर्णा स्थूणेव सुमिता दृंहत द्यौः ॥ ५ ०४५ ०२
अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ।
वि पर्वतो जिहीत साधत द्यौर् आविवासन्तो दसयन्त भूम ॥ ५ ०४५ ०३
सूक्तेभिर् वो वचोभिर् देवजुष्टैर् इन्द्रा न्व् अ१ग्नी अवसे हुवध्यै ।
उक्थेभिर् हि ष्मा कवयः सुयज्ञा आविवासन्तो मरुतो यजन्ति ॥ ५ ०४५ ०४

एतो न्व् अ१द्य सुध्यो३ भवाम प्र दुच्छुना मिनवामा वरीयः ।
आरे द्वेषांसि सनुतर् दधामायाम प्राञ्चो यजमानम् अच्छ ॥ ५ ०४५ ०५
एता धियं कृणवामा सखायो ऽप या माताꣳ ऋणुत व्रजं गोः ।
यया मनुर् विशिशिप्रं जिगाय यया वणिग् वङ्कुर् आपा पुरीषम् ॥ ५ ०४५ ०६
अनूनोद् अत्र हस्तयतो अद्रिर् आर्चन् येन दश मासो नवग्वाः ।
ऋतं यती सरमा गा अविन्दद् विश्वानि सत्याङ्गिराश् चकार ॥ ५ ०४५ ०७
विश्वे अस्या व्युषि माहिनायाः सं यद् गोभिर् अङ्गिरसो नवन्त ।
उत्स आसाम् परमे सधस्थ ऋतस्य पथा सरमा विदद् गाः ॥ ५ ०४५ ०८
आ सूर्यो यातु सप्ताश्वः क्षेत्रं यद् अस्योर्विया दीर्घयाथे ।
रघुः श्येनः पतयद् अन्धो अच्छा युवा कविर् दीदयद् गोषु गच्छन् ॥ ५ ०४५ ०९
आ सूर्यो अरुहच् छुक्रम् अर्णो ऽयुक्त यद् धरितो वीतपृष्ठाः ।
उद्ना न नावम् अनयन्त धीरा आशृण्वतीर् आपो अर्वाग् अतिष्ठन् ॥ ५ ०४५ १०
धियं वो अप्सु दधिषे स्वर्षां ययातरन् दश मासो नवग्वाः ।
अया धिया स्याम देवगोपा अया धिया तुतुर्यामात्य् अंहः ॥ ५ ०४५ ११

(४००)

हयो न विद्वाꣳ अयुजि स्वयं धुरि तां वहामि प्रतरणीम् अवस्युवम् ।
नास्या वश्मि विमुचं नावृतम् पुनर् विद्वान् पथः पुरएत ऋजु नेषति ॥ ५ ०४६ ०१
अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ॥ ५ ०४६ ०२
इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्याम् मरुतः पर्वताꣳ अपः ।
हुवे विष्णुम् पूषणम् ब्रह्मणस् पतिम् भगं नु शंसं सवितारम् ऊतये ॥ ५ ०४६ ०३
उत नो विष्णुर् उत वातो अस्रिधो द्रविणोदा उत सोमो मयस् करत् ।
उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वानु मंसते ॥ ५ ०४६ ०४
उत त्यन् नो मारुतं शर्ध आ गमद् दिविक्षयं यजतम् बर्हिर् आसदे ।
बृहस्पतिः शर्म पूषोत नो यमद् वरूथ्य१ं वरुणो मित्रो अर्यमा ॥ ५ ०४६ ०५
उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नद्य१स् त्रामणे भुवन् ।

भगो विभक्ता शवसावसा गमद् उरुव्यचा अदितिः श्रोतु मे हवम् ॥ ५ ०४६ ०६
देवानाम् पत्नीर् उशतीर् अवन्तु नः प्रावन्तु नस् तुजये वाजसातये ।
याः पार्थिवासो या अपाम् अपि व्रते ता नो देवीः सुहवाः शर्म यच्छत ॥ ५ ०४६ ०७
उत ग्ना व्यन्तु देवपत्नीर् इन्द्राण्य् अ१ग्नाय्य् अश्विनी राट् ।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर् य ऋतुर् जनीनाम् ॥ ५ ०४६ ०८

(४०१)
प्रयुञ्जती दिव एति ब्रुवाणा मही माता दुहितुर् बोधयन्ती ।
आविवासन्ती युवतिर् मनीषा पितृभ्य आ सदने जोहुवाना ॥ ५ ०४७ ०१
अजिरासस् तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिम् ।
अनन्तास उरवो विश्वतः सीम् परि द्यावापृथिवी यन्ति पन्थाः ॥ ५ ०४७ ०२
उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिम् पितुर् आ विवेश ।
मध्ये दिवो निहितः पृश्निर् अश्मा वि चक्रमे रजसस् पात्य् अन्तौ ॥ ५ ०४७ ०३
चत्वार ईम् बिभ्रति क्षेमयन्तो दश गर्भं चरसे धापयन्ते ।
त्रिधातवः परमा अस्य गावो दिवश् चरन्ति परि सद्यो अन्तान् ॥ ५ ०४७ ०४
इदं वपुर् निवचनं जनासश् चरन्ति यन् नद्यस् तस्थुर् आपः ।
द्वे यद् ईम् बिभृतो मातुर् अन्ये इहेह जाते यम्या३ सबन्धू ॥ ५ ०४७ ०५
वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयन्ति ।
उपप्रक्षे वृषणो मोदमाना दिवस् पथा वध्वो यन्त्य् अच्छ ॥ ५ ०४७ ०६
तद् अस्तु मित्रावरुणा तद् अग्ने शं योर् अस्मभ्यम् इदम् अस्तु शस्तम् ।
अशीमहि गाधम् उत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥ ५ ०४७ ०७

(४०२)
कद् उ प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम् ।
आमेन्यस्य रजसो यद् अभ्र आँ अपो वृणाना वितनोति मायिनी ॥ ५ ०४८ ०१

ता अत्नत वयुनं वीरवक्षणं समान्या वृतया विश्वम् आ रजः ।
अपो अपाचीर् अपरा अपेजते प्र पूर्वाभिस् तिरते देवयुर् जनः ॥ ५ ०४८ ०२
आ ग्रावभिर् अहन्येभिर् अक्तुभिर् वरिष्ठं वज्रम् आ जिघर्ति मायिनि ।
शतं वा यस्य प्रचरन् स्वे दमे संवर्तयन्तो वि च वर्तयन्न् अहा ॥ ५ ०४८ ०३
ताम् अस्य रीतिम् परशोर् इव प्रत्य् अनीकम् अख्यम् भुजे अस्य वर्पसः ।
सचा यदि पितुमन्तम् इव क्षयं रत्नं दधाति भरहूतये विशे ॥ ५ ०४८ ०४
स जिह्वया चतुरनीक ऋञ्जते चारु वसानो वरुणो यतन्न् अरिम् ।
न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यम् ॥ ५ ०४८ ०५

(४०३)
देवं वो अद्य सवितारम् एषे भगं च रत्नं विभजन्तम् आयोः ।
आ वां नरा पुरुभुजा ववृत्यां दिवे-दिवे चिद् अश्विना सखीयन् ॥ ५ ०४९ ०१
प्रति प्रयाणम् असुरस्य विद्वान् सूक्तैर् देवं सवितारं दुवस्य ।
उप ब्रुवीत नमसा विजानञ् ज्येष्ठं च रत्नं विभजन्तम् आयोः ॥ ५ ०४९ ०२
अदत्रया दयते वार्याणि पूषा भगो अदितिर् वस्त उस्रः ।
इन्द्रो विष्णुर् वरुणो मित्रो अग्निर् अहानि भद्रा जनयन्त दस्माः ॥ ५ ०४९ ०३
तन् नो अनर्वा सविता वरूथं तत् सिन्धव इषयन्तो अनु ग्मन् ।
उप यद् वोचे अध्वरस्य होता रायः स्याम पतयो वाजरत्नाः ॥ ५ ०४९ ०४
प्र ये वसुभ्य ईवद् आ नमो दुर् ये मित्रे वरुणे सूक्तवाचः ।
अवैत्व् अभ्वं कृणुता वरीयो दिवस्पृथिव्योर् अवसा मदेम ॥ ५ ०४९ ०५

(४०४)
विश्वो देवस्य नेतुर् मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ॥ ५ ०५० ०१
ते ते देव नेतर् ये चेमाꣳ अनुशसे ।
ते राया ते ह्य आ ३ पृचे सचेमहि सचथ्याइः ॥ ५ ०५० ०२

अतो न आ नॄन् अतिथीन् अतः पत्नीर् दशस्यत ।
आरे विश्वम् पथेष्ठां द्विषो युयोतु यूयुविः ॥ ५ ०५० ०३
यत्र वह्निर् अभिहितो दुद्रवद् द्रोण्यः पशुः ।
नृमणा वीरपस्त्यो ऽर्णा धीरेव सनिता ॥ ५ ०५० ०४
एष ते देव नेता रथस्पतिः शं रयिः ।
शं राये शं स्वस्तय इषस्तुतो मनामहे देवस्तुतो मनामहे ॥ ५ ०५० ०५

(४०५)
अग्ने सुतस्य पीतये विश्वैर् ऊमेभिर् आ गहि ।
देवेभिर् हव्यदातये ॥ ५ ०५१ ०१
ऋतधीतय आ गत सत्यधर्माणो अध्वरम् ।
अग्नेः पिबत जिह्वया ॥ ५ ०५१ ०२
विप्रेभिर् विप्र सन्त्य प्रातर्यावभिर् आ गहि ।
देवेभिः सोमपीतये ॥ ५ ०५१ ०३
अयं सोमश् चमू सुतो ऽमत्रे परि षिच्यते ।
प्रिय इन्द्राय वायवे ॥ ५ ०५१ ०४
वायव् आ याहि वीतये जुषाणो हव्यदातये ।
पिबा सुतस्यान्धसो अभि प्रयः ॥ ५ ०५१ ०५
इन्द्रश् च वायव् एषां सुतानाम् पीतिम् अर्हथः ।
ताञ् जुषेथाम् अरेपसाव् अभि प्रयः ॥ ५ ०५१ ०६
सुता इन्द्राय वायवे सोमासो दध्याशिरः ।
निम्नं न यन्ति सिन्धवो ऽभि प्रयः ॥ ५ ०५१ ०७
सजूर् विश्वेभिर् देवेभिर् अश्विभ्याम् उषसा सजूः ।
आ याह्य् अग्ने अत्रिवत् सुते रण ॥ ५ ०५१ ०८
सजूर् मित्रावरुणाभ्यां सजूः सोमेन विष्णुना ।
आ याह्य् अग्ने अत्रिवत् सुते रण ॥ ५ ०५१ ०९
सजूर् आदित्यैर् वसुभिः सजूर् इन्द्रेण वायुना ।

आ याह्य् अग्ने अत्रिवत् सुते रण ॥ ५ ०५१ १०
स्वस्ति नो मिमीताम् अश्विना भगः स्वस्ति देव्य् अदितिर् अनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥ ५ ०५१ ११
स्वस्तये वायुम् उप ब्रवामहै सोमं स्वस्ति भुवनस्य यस् पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥ ५ ०५१ १२
विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुर् अग्निः स्वस्तये ।
देवा अवन्त्व् ऋभवः स्वस्तये स्वस्ति नो रुद्रः पात्व् अंहसः ॥ ५ ०५१ १३
स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्रश् चाग्निश् च स्वस्ति नो अदिते कृधि ॥ ५ ०५१ १४
स्वस्ति पन्थाम् अनु चरेम सूर्याचन्द्रमसाव् इव ।
पुनर् ददताघ्नता जानता सं गमेमहि ॥ ५ ०५१ १५

(४०६)
प्र श्यावाश्व धृष्णुयार्चा मरुद्भिर् ऋक्वभिः ।
ये अद्रोघम् अनुष्वधं श्रवो मदन्ति यज्ञियाः ॥ ५ ०५२ ०१
ते हि स्थिरस्य शवसः सखायः सन्ति धृष्णुया ।
ते यामन्न् आ धृषद्विनस् त्मना पान्ति शश्वतः ॥ ५ ०५२ ०२
ते स्यन्द्रासो नोक्षणो ऽति ष्कन्दन्ति शर्वरीः ।
मरुताम् अधा महो दिवि क्षमा च मन्महे ॥ ५ ०५२ ०३
मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया ।
विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः ॥ ५ ०५२ ०४
अर्हन्तो ये सुदानवो नरो असामिशवसः ।
प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः ॥ ५ ०५२ ०५
आ रुक्मैर् आ युधा नर ऋष्वा ऋष्टीर् असृक्षत ।
अन्व् एनाँ अह विद्युतो मरुतो जज्झतीर् इव भानुर् अर्त त्मना दिवः ॥ ५ ०५२ ०६
ये वावृधन्त पार्थिवा य उराव् अन्तरिक्ष आ ।
वृजने वा नदीनां सधस्थे वा महो दिवः ॥ ५ ०५२ ०७

शर्धो मारुतम् उच् छंस सत्यशवसम् ऋभ्वसम् ।
उत स्म ते शुभे नरः प्र स्यन्द्रा युजत त्मना ॥ ५ ०५२ ०८
उत स्म ते परुष्ण्याम् ऊर्णा वसत शुन्ध्यवः ।
उत पव्या रथानाम् अद्रिम् भिन्दन्त्य् ओजसा ॥ ५ ०५२ ०९
आपथयो विपथयो ऽन्तस्पथा अनुपथाः ।
एतेभिर् मह्यं नामभिर् यज्ञं विष्टार ओहते ॥ ५ ०५२ १०
अधा नरो न्य् ओहते ऽधा नियुत ओहते ।
अधा पारावता इति चित्रा रूपाणि दर्श्या ॥ ५ ०५२ ११
छन्दस्तुभः कुभन्यव उत्सम् आ कीरिणो नृतुः ।
ते मे के चिन् न तायव ऊमा आसन् दृशि त्विषे ॥ ५ ०५२ १२
य ऋष्वा ऋष्टिविद्युतः कवयः सन्ति वेधसः ।
तम् ऋषे मारुतं गणं नमस्या रमया गिरा ॥ ५ ०५२ १३
अच्छ ऋषे मारुतं गणं दाना मित्रं न योषणा ।
दिवो वा धृष्णव ओजसा स्तुता धीभिर् इषण्यत ॥ ५ ०५२ १४
नू मन्वान एषां देवाँ अच्छा न वक्षणा ।
दाना सचेत सूरिभिर् यामश्रुतेभिर् अञ्जिभिः ॥ ५ ०५२ १५
प्र ये मे बन्ध्वेषे गां वोचन्त सूरयः पृश्निं वोचन्त मातरम् ।
अधा पितरम् इष्मिणं रुद्रं वोचन्त शिक्वसः ॥ ५ ०५२ १६
सप्त मे सप्त शाकिन एकम्-एका शता ददुः ।
यमुनायाम् अधि श्रुतम् उद् राधो गव्यम् मृजे नि राधो अश्व्यम् मृजे ॥ ५ ०५२ १७

(४०७)
को वेद जानम् एषां को वा पुरा सुम्नेष्व् आस मरुताम् ।
यद् युयुज्रे किलास्यः ॥ ५ ०५३ ०१
ऐतान् रथेषु तस्थुषः कः शुश्राव कथा ययुः ।
कस्मै सस्रुः सुदासे अन्व् आपय इळाभिर् वृष्टयः सह ॥ ५ ०५३ ०२
ते म आहुर् य आययुर् उप द्युभिर् विभिर् मदे ।

नरो मर्या अरेपस इमान् पश्यन्न् इति ष्टुहि ॥ ५ ०५३ ०३
ये अञ्जिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु ।
श्राया रथेषु धन्वसु ॥ ५ ०५३ ०४
युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः ।
वृष्टी द्यावो यतीर् इव ॥ ५ ०५३ ०५
आ यं नरः सुदानवो ददाशुषे दिवः कोशम् अचुच्यवुः ।
वि पर्जन्यं सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः ॥ ५ ०५३ ०६
ततृदानाः सिन्धवः क्षोदसा रजः प्र सस्रुर् धेनवो यथा ।
स्यन्ना अश्वा इवाध्वनो विमोचने वि यद् वर्तन्त एन्यः ॥ ५ ०५३ ०७
आ यात मरुतो दिव आन्तरिक्षाद् अमाद् उत ।
माव स्थात परावतः ॥ ५ ०५३ ०८
मा वो रसानितभा कुभा क्रुमुर् मा वः सिन्धुर् नि रीरमत् ।
मा वः परि ष्ठात् सरयुः पुरीषिण्य् अस्मे ईत् सुम्नम् अस्तु वः ॥ ५ ०५३ ०९
तं वः शर्धं रथानां त्वेषं गणम् मारुतं नव्यसीनाम् ।
अनु प्र यन्ति वृष्टयः ॥ ५ ०५३ १०
शर्धं-शर्धं व एषां व्रातं-व्रातं गणं-गणं सुशस्तिभिः ।
अनु क्रामेम धीतिभिः ॥ ५ ०५३ ११
कस्मा अद्य सुजाताय रातहव्याय प्र ययुः ।
एना यामेन मरुतः ॥ ५ ०५३ १२
येन तोकाय तनयाय धान्य१म् बीजं वहध्वे अक्षितम् ।
अस्मभ्यं तद् धत्तन यद् व ईमहे राधो विश्वायु सौभगम् ॥ ५ ०५३ १३
अतीयाम निदस् तिरः स्वस्तिभिर् हित्वावद्यम् अरातीः ।
वृष्ट्वी शं योर् आप उस्रि भेषजं स्याम मरुतः सह ॥ ५ ०५३ १४
सुदेवः समहासति सुवीरो नरो मरुतः स मर्त्यः ।
यं त्रायध्वे स्याम ते ॥ ५ ०५३ १५
स्तुहि भोजान् स्तुवतो अस्य यामनि रणन् गावो न यवसे ।
यतः पूर्वाँ इव सखीँर् अनु ह्वय गिरा गृणीहि कामिनः ॥ ५ ०५३ १६

(४०८)

प्र शर्धाय मारुताय स्वभानव इमां वाचम् अनजा पर्वतच्युते ।
घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णम् अर्चत ॥ ५ ०५४ ०१
प्र वो मरुतस् तविषा उदन्यवो वयोवृधो अश्वयुजः परिज्रयः ।
सं विद्युता दधति वाशति त्रितः स्वरन्त्य् आपो ऽवना परिज्रयः ॥ ५ ०५४ ०२
विद्युन्महसो नरो अश्मदिद्यवो वातत्विषो मरुतः पर्वतच्युतः ।
अब्दया चिन् मुहुर् आ ह्रादुनीवृत स्तनयदमा रभसा उदोजसः ॥ ५ ०५४ ०३
व्य् अ१क्तून् रुद्रा व्य् अहानि शिक्वसो व्य् अ१न्तरिक्षं वि रजांसि धूतयः ।
वि यद् अज्राँ अजथ नाव ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ ॥ ५ ०५४ ०४
तद् वीर्यं वो मरुतो महित्वनं दीर्घं ततान सूर्यो न योजनम् ।
एता न यामे अगृभीतशोचिषो ऽनश्वदां यन् न्य् अयातना गिरिम् ॥ ५ ०५४ ०५
अभ्राजि शर्धो मरुतो यद् अर्णसम् मोषथा वृक्षं कपनेव वेधसः ।
अध स्मा नो अरमतिं सजोषसश् चक्षुर् इव यन्तम् अनु नेषथा सुगम् ॥ ५ ०५४ ०६
न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति ।
नास्य राय उप दस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ ॥ ५ ०५४ ०७
नियुत्वन्तो ग्रामजितो यथा नरो ऽर्यमणो न मरुतः कबन्धिनः ।
पिन्वन्त्य् उत्सं यद् इनासो अस्वरन् व्य् उन्दन्ति पृथिवीम् मध्वो अन्धसा ॥ ५ ०५४ ०८
प्रवत्वतीयम् पृथिवी मरुद्भ्यः प्रवत्वती द्यौर् भवति प्रयद्भ्यः ।
प्रवत्वतीः पथ्या अन्तरिक्ष्याः प्रवत्वन्तः पर्वता जीरदानवः ॥ ५ ०५४ ०९
यन् मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा दिवो नरः ।
न वो ऽश्वाः श्रथयन्ताह सिस्रतः सद्यो अस्याध्वनः पारम् अश्नुथ ॥ ५ ०५४ १०
अंसेषु व ऋष्टयः पत्सु खादयो वक्षस्सु रुक्मा मरुतो रथे शुभः ।
अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययीः ॥ ५ ०५४ ११
तं नाकम् अर्यो अगृभीतशोचिषं रुशत् पिप्पलम् मरुतो वि धूनुथ ।
सम् अच्यन्त वृजनातित्विषन्त यत् स्वरन्ति घोषं विततम् ऋतायवः ॥ ५ ०५४ १२
युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो ३ वयस्वतः ।

न यो युच्छति तिष्यो यथा दिवो ऽस्मे रारन्त मरुतः सहस्रिणम् ॥ ५ ०५४ १३
यूयं रयिम् मरुत स्पार्हवीरं यूयम् ऋषिम् अवथ सामविप्रम् ।
यूयम् अर्वन्तम् भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमन्तम् ॥ ५ ०५४ १४
तद् वो यामि द्रविणं सद्यऊतयो येना स्व१र् ण ततनाम नॄँर् अभि ।
इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः ॥ ५ ०५४ १५

(४०९)
प्रयज्यवो मरुतो भ्राजदृष्टयो बृहद् वयो दधिरे रुक्मवक्षसः ।
ईयन्ते अश्वैः सुयमेभिर् आशुभिः शुभं याताम् अनु रथा अवृत्सत ॥ ५ ०५५ ०१
स्वयं दधिध्वे तविषीं यथा विद बृहन् महान्त उर्विया वि राजथ ।
उतान्तरिक्षम् ममिरे व्य् ओजसा शुभं याताम् अनु रथा अवृत्सत ॥ ५ ०५५ ०२
साकं जाताः सुभ्वः साकम् उक्षिताः श्रिये चिद् आ प्रतरं वावृधुर् नरः ।
विरोकिणः सूर्यस्येव रश्मयः शुभं याताम् अनु रथा अवृत्सत ॥ ५ ०५५ ०३
आभूषेण्यं वो मरुतो महित्वनं दिदृक्षेण्यं सूर्यस्येव चक्षणम् ।
उतो अस्माँ अमृतत्वे दधातन शुभं याताम् अनु रथा अवृत्सत ॥ ५ ०५५ ०४
उद् ईरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।
न वो दस्रा उप दस्यन्ति धेनवः शुभं याताम् अनु रथा अवृत्सत ॥ ५ ०५५ ०५
यद् अश्वान् धूर्षु पृषतीर् अयुग्ध्वं हिरण्ययान् प्रत्य् अत्काँ अमुग्ध्वम् ।
विश्वा इत् स्पृधो मरुतो व्य् अस्यथ शुभं याताम् अनु रथा अवृत्सत ॥ ५ ०५५ ०६
न पर्वता न नद्यो वरन्त वो यत्राचिध्वम् मरुतो गच्छथेद् उ तत् ।
उत द्यावापृथिवी याथना परि शुभं याताम् अनु रथा अवृत्सत ॥ ५ ०५५ ०७
यत् पूर्व्यम् मरुतो यच् च नूतनं यद् उद्यते वसवो यच् च शस्यते ।
विश्वस्य तस्य भवथा नवेदसः शुभं याताम् अनु रथा अवृत्सत ॥ ५ ०५५ ०८
मृळत नो मरुतो मा वधिष्टनास्मभ्यं शर्म बहुलं वि यन्तन ।
अधि स्तोत्रस्य सख्यस्य गातन शुभं याताम् अनु रथा अवृत्सत ॥ ५ ०५५ ०९
यूयम् अस्मान् नयत वस्यो अच्छा निर् अंहतिभ्यो मरुतो गृणानाः ।
जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणाम् ॥ ५ ०५५ १०

(४१०)
अग्ने शर्धन्तम् आ गणम् पिष्टं रुक्मेभिर् अञ्जिभिः ।
विशो अद्य मरुताम् अव ह्वये दिवश् चिद् रोचनाद् अधि ॥ ५ ०५६ ०१
यथा चिन् मन्यसे हृदा तद् इन् मे जग्मुर् आशसः ।
ये ते नेदिष्ठं हवनान्य् आगमन् तान् वर्ध भीमसंदृशः ॥ ५ ०५६ ०२
मीळ्हुष्मतीव पृथिवी पराहता मदन्त्य् एत्य् अस्मद् आ ।
ऋक्षो न वो मरुतः शिमीवाँ अमो दुध्रो गौर् इव भीमयुः ॥ ५ ०५६ ०३
नि ये रिणन्त्य् ओजसा वृथा गावो न दुर्धुरः ।
अश्मानं चित् स्वर्य१म् पर्वतं गिरिम् प्र च्यावयन्ति यामभिः ॥ ५ ०५६ ०४
उत् तिष्ठ नूनम् एषां स्तोमैः समुक्षितानाम् ।
मरुताम् पुरुतमम् अपूर्व्यं गवां सर्गम् इव ह्वये ॥ ५ ०५६ ०५
युङ्ग्ध्वं ह्य् अरुषी रथे युङ्ग्ध्वं रथेषु रोहितः ।
युङ्ग्ध्वं हरी अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ॥ ५ ०५६ ०६
उत स्य वाज्य् अरुषस् तुविष्वणिर् इह स्म धायि दर्शतः ।
मा वो यामेषु मरुतश् चिरं करत् प्र तं रथेषु चोदत ॥ ५ ०५६ ०७
रथं नु मारुतं वयं श्रवस्युम् आ हुवामहे ।
आ यस्मिन् तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥ ५ ०५६ ०८
तं वः शर्धं रथेशुभं त्वेषम् पनस्युम् आ हुवे ।
यस्मिन् सुजाता सुभगा महीयते सचा मरुत्सु मीळ्हुषी ॥ ५ ०५६ ०९

(४११)
आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन ।
इयं वो अस्मत् प्रति हर्यते मतिस् तृष्णजे न दिव उत्सा उदन्यवे ॥ ५ ०५७ ०१
वाशीमन्त ऋष्टिमन्तो मनीषिणः सुधन्वान इषुमन्तो निषङ्गिणः ।
स्वश्वा स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभम् ॥ ५ ०५७ ०२

धूनुथ द्याम् पर्वतान् दाशुषे वसु नि वो वना जिहते यामनो भिया ।
कोपयथ पृथिवीम् पृश्निमातरः शुभे यद् उग्राः पृषतीर् अयुग्ध्वम् ॥ ५ ०५७ ०३
वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः ।
पिशङ्गाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौर् इवोरवः ॥ ५ ०५७ ०४
पुरुद्रप्सा अञ्जिमन्तः सुदानवस् त्वेषसंदृशो अनवभ्रराधसः ।
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ॥ ५ ०५७ ०५
ऋष्टयो वो मरुतो अंसयोर् अधि सह ओजो बाह्वोर् वो बलं हितम् ।
नृम्णा शीर्षस्व् आयुधा रथेषु वो विश्वा वः श्रीर् अधि तनूषु पिपिशे ॥ ५ ०५७ ०६
गोमद् अश्वावद् रथवत् सुवीरं चन्द्रवद् राधो मरुतो ददा नः ।
प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य ॥ ५ ०५७ ०७
हये नरो मरुतो मृळता नस् तुवीमघासो अमृता ऋतज्ञाः ।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहद् उक्षमाणाः ॥ ५ ०५७ ०८

(४१२)
तम् उ नूनं तविषीमन्तम् एषां स्तुषे गणम् मारुतं नव्यसीनाम् ।
य आश्वश्वा अमवद् वहन्त उतेशिरे अमृतस्य स्वराजः ॥ ५ ०५८ ०१
त्वेषं गणं तवसं खादिहस्तं धुनिव्रतम् मायिनं दातिवारम् ।
मयोभुवो ये अमिता महित्वा वन्दस्व विप्र तुविराधसो नॄन् ॥ ५ ०५८ ०२
आ वो यन्तूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनन्ति ।
अयं यो अग्निर् मरुतः समिद्ध एतं जुषध्वं कवयो युवानः ॥ ५ ०५८ ०३
यूयं राजानम् इर्यं जनाय विभ्वतष्टं जनयथा यजत्राः ।
युष्मद् एति मुष्टिहा बाहुजूतो युष्मद् सदश्वो मरुतः सुवीरः ॥ ५ ०५८ ०४
अरा इवेद् अचरमा अहेव प्र-प्र जायन्ते अकवा महोभिः ।
पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सम् मिमिक्षुः ॥ ५ ०५८ ०५
यत् प्रायासिष्ट पृषतीभिर् अश्वैर् वीळुपविभिर् मरुतो रथेभिः ।
क्षोदन्त आपो रिणते वनान्य् अवोस्रियो वृषभः क्रन्दतु द्यौः ॥ ५ ०५८ ०६
प्रथिष्ट यामन् पृथिवी चिद् एषाम् भर्तेव गर्भं स्वम् इच् छवो धुः ।

वाता॒न् ह्य॒ अश्वा॑न् धु॒र्य् आयुयु॒ज्रे व॒र्षं स्वेदं॑ चक्रिरे रु॒द्रिया॑सः ॥ ५ ०५८ ०७
ह॒ये नरो॒ मरु॑तो मृ॒ळता॑ न॒स् तुवी॑मघासो॒ अमृ॑ता॒ ऋत॑ज्ञाः ।
सत्य॑श्रुतः॒ कव॑यो॒ युवा॑नो॒ बृह॑द्गिरयो बृ॒हद् उ॒क्षमा॑णाः ॥ ५ ०५८ ०८

(४१३)
प्र व॒ स्पळ् अ॑क्रन् सुवि॒ताय॑ दा॒वने ऽर्चा॑ दि॒वे प्र पृ॑थि॒व्या ऋ॒तम् भ॑रे ।
उ॒क्षन्ते॒ अश्वा॒न् तरु॑षन्त॒ आ रजो ऽनु॒ स्वम् भा॒नुं श्र॑थयन्ते अर्ण॒वैः ॥ ५ ०५९ ०१
अमा॑द् एषाम् भि॒यसा॒ भूमि॑र् एजति॒ नौर् न पू॒र्णा क्ष॑रति॒ व्यथि॑र् य॒ती ।
दू॒रे॒दृशो॒ ये चि॒तय॑न्त॒ एम॑भिर् अ॒न्तर् म॒हे वि॒दथे॑ येतिरे॒ नरः॑ ॥ ५ ०५९ ०२
गवा॑म् इव श्रि॒यसे॒ शृङ्ग॑म् उत्त॒मं सूर्यो॒ न चक्षू॒ रज॑सो वि॒सर्ज॑ने ।
अत्या॑ इव सु॒भ्व १॒॑ श् चार॑व स्थन॒ मर्या॑ इव श्रि॒यसे॑ चेतथा नरः ॥ ५ ०५९ ०३
को वो॑ म॒हान्ति॑ मह॒ताम् उद् अ॑श्नवत् कस् काव्या॑ मरुतः॒ को ह॒ पौंस्या॑ ।
यू॒यं ह॒ भूमिं॑ कि॒रणं॒ न रे॑जथ॒ प्र यद् भर॑ध्वे सुवि॒ताय॑ दा॒वने॑ ॥ ५ ०५९ ०४
अश्वा॑ इ॒वेद् अ॑रु॒षासः॒ सब॑न्धवः॒ शूरा॑ इव प्र॒युधः॒ प्रोत यु॑युधुः ।
मर्या॑ इव सु॒वृधो॑ वावृधु॒र् नरः॒ सूर्य॑स्य॒ चक्षुः॒ प्र मि॑नन्ति वृ॒ष्टिभिः॑ ॥ ५ ०५९ ०५
ते अ॑ज्येष्ठा अक॑निष्ठास उ॒द्भिदो ऽम॑ध्यमासो॒ मह॑सा॒ वि वा॑वृधुः ।
सु॒जा॒तासो॑ ज॒नुषा॒ पृश्नि॑मातरो दि॒वो मर्या॒ आ नो॒ अच्छा॑ जिगातन ॥ ५ ०५९ ०६
वयो॒ न ये श्रेणीः॑ प॒प्तुर् ओज॒सान्ता॑न् दि॒वो बृ॑ह॒तः सानु॑न॒स् परि॑ ।
अश्वा॑स एषाम् उ॒भये॒ यथा॑ वि॒दुः प्र पर्व॑तस्य नभ॒नूर्॒ अ॑चुच्यवुः ॥ ५ ०५९ ०७
मिमा॑तु॒ द्यौर् अदि॑तिर् वी॒तये॑ नः॒ सं दानु॑चित्रा उ॒षसो॑ यतन्ताम् ।
आचु॑च्यवुर् दि॒व्यं कोश॑म् ए॒त ऋषे॑ रु॒द्रस्य॑ म॒रुतो॑ गृणा॒नाः ॥ ५ ०५९ ०८

(४१४)
ईळे॑ अ॒ग्निं स्वव॑सं॒ नमो॑भिर् इ॒ह प्र॑स॒त्तो वि च॑यत् कृ॒तं नः॑ ।
रथै॑र् इव॒ प्र भ॑रे वाज॒यद्भिः॑ प्रदक्षि॒णिन् म॒रुतां॒ स्तोम॑म् ऋध्याम् ॥ ५ ०६० ०१
आ ये त॒स्थुः पृष॑तीषु श्रु॒तासु॑ सु॒खेषु॑ रु॒द्रा म॒रुतो॒ रथे॑षु ।

वना चिद् उग्रा जिहते नि वो भिया पृथिवी चिद् रेजते पर्वतश् चित् ॥ ५ ०६० ०२
पर्वतश् चिन् महि वृद्धो बिभाय दिवश् चित् सानु रेजत स्वने वः ।
यत् क्रीळथ मरुत ऋष्टिमन्त आप इव सध्र्यञ्चो धवध्वे ॥ ५ ०६० ०३
वरा इवेद् रैवतासो हिरण्यैर् अभि स्वधाभिस् तन्वः पिपिश्रे ।
श्रिये श्रेयांसस् तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु ॥ ५ ०६० ०४
अज्येष्ठासो अकनिष्ठास एते सम् भ्रातरो वावृधुः सौभगाय ।
युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः ॥ ५ ०६० ०५
यद् उत्तमे मरुतो मध्यमे वा यद् वावमे सुभगासो दिवि ष्ठ ।
अतो नो रुद्रा उत वा न्व् अ१स्याग्ने वित्ताद् धविषो यद् यजाम ॥ ५ ०६० ०६
अग्निश् च यन् मरुतो विश्ववेदसो दिवो वहध्व उत्तराद् अधि ष्णुभिः ।
ते मन्दसाना धुनयो रिशादसो वामं धत्त यजमानाय सुन्वते ॥ ५ ०६० ०७
अग्ने मरुद्भिः शुभयद्भिर् ऋक्वभिः सोमम् पिब मन्दसानो गणश्रिभिः ।
पावकेभिर् विश्वमिन्वेभिर् आयुभिर् वैश्वानर प्रदिवा केतुना सजूः ॥ ५ ०६० ०८

(४१५)
के ष्ठा नरः श्रेष्ठतमा य एक-एक आयय ।
परमस्याः परावतः ॥ ५ ०६१ ०१
क्व१ वोऽश्वाः क्वा३ भीशवः कथं शेक कथा यय ।
पृष्ठे सदो नसोर् यमः ॥ ५ ०६१ ०२
जघने चोद एषां वि सक्थानि नरो यमुः ।
पुत्रकृथे न जनयः ॥ ५ ०६१ ०३
परा वीरास एतन मर्यासो भद्रजानयः ।
अग्नितपो यथासथ ॥ ५ ०६१ ०४
सनत् साश्व्यम् पशुम् उत गव्यं शतावयम् ।
श्यावाश्वस्तुताय या दोर् वीरायोपबर्बृहत् ॥ ५ ०६१ ०५
उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी ।
अदेवत्राद् अराधसः ॥ ५ ०६१ ०६

वि या जानाति जसुरिं वि तृष्यन्तं वि कामिनम् ।
देवत्रा कृणुते मनः ॥ ५ ०६१ ०७
उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः ।
स वैरदेय इत् समः ॥ ५ ०६१ ०८
उत मे ऽरपद् युवतिर् ममन्दुषी प्रति श्यावाय वर्तनिम् ।
वि रोहिता पुरुमीळ्हाय येमतुर् विप्राय दीर्घयशसे ॥ ५ ०६१ ०९
यो मे धेनूनां शतं वैददश्विर् यथा ददत् ।
तरन्त इव मंहना ॥ ५ ०६१ १०
य ईं वहन्त आशुभिः पिबन्तो मदिरम् मधु ।
अत्र श्रवांसि दधिरे ॥ ५ ०६१ ११
येषां श्रियाधि रोदसी विभ्राजन्ते रथेष्व् आ ।
दिवि रुक्म इवोपरि ॥ ५ ०६१ १२
युवा स मारुतो गणस् त्वेषरथो अनेद्यः ।
शुभंयावाप्रतिष्कुतः ॥ ५ ०६१ १३
को वेद नूनम् एषां यत्रा मदन्ति धूतयः ।
ऋतजाता अरेपसः ॥ ५ ०६१ १४
यूयम् मर्तं विपन्यवः प्रणेतार इत्था धिया ।
श्रोतारो यामहूतिषु ॥ ५ ०६१ १५
ते नो वसूनि काम्या पुरुश्चन्द्रा रिशादसः ।
आ यज्ञियासो ववृत्तन ॥ ५ ०६१ १६
एतम् मे स्तोमम् ऊर्म्ये दार्भ्याय परा वह ।
गिरो देवि रथीर् इव ॥ ५ ०६१ १७
उत मे वोचताद् इति सुतसोमे रथवीतौ ।
न कामो अप वेति मे ॥ ५ ०६१ १८
एष क्षेति रथवीतिर् मघवा गोमतीर् अनु ।
पर्वतेष्व् अपश्रितः ॥ ५ ०६१ १९

(४१६)
ऋतेन ऋतम् अपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचन्त्य् अश्वान् ।
दश शता सह तस्थुस् तद् एकं देवानां श्रेष्ठं वपुषाम् अपश्यम् ॥ ५ ०६२ ०१
तत् सु वाम् मित्रावरुणा महित्वम् ईर्मा तस्थुषीर् अहभिर् दुदुह्रे ।
विश्वाः पिन्वथः स्वसरस्य धेना अनु वाम् एकः पविर् आ ववर्त ॥ ५ ०६२ ०२
अधारयतम् पृथिवीम् उत द्याम् मित्रराजाना वरुणा महोभिः ।
वर्धयतम् ओषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू ॥ ५ ०६२ ०३
आ वाम् अश्वासः सुयुजो वहन्तु यतरश्मय उप यन्त्व् अर्वाक् ।
घृतस्य निर्णिग् अनु वर्तते वाम् उप सिन्धवः प्रदिवि क्षरन्ति ॥ ५ ०६२ ०४
अनु श्रुताम् अमतिं वर्धद् उर्वीम् बर्हिर् इव यजुषा रक्षमाणा ।
नमस्वन्ता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्व् अन्तः ॥ ५ ०६२ ०५
अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्व् अन्तः ।
राजाना क्षत्रम् अहृणीयमाना सहस्रस्थूणम् बिभृथः सह द्वौ ॥ ५ ०६२ ०६
हिरण्यनिर्णिग् अयो अस्य स्थूणा वि भ्राजते दिव्य् अ १ श्वाजनीव ।
भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य ॥ ५ ०६२ ०७
हिरण्यरूपम् उषसो व्युष्टाव् अयस्थूणम् उदिता सूर्यस्य ।
आ रोहथो वरुण मित्र गर्तम् अतश् चक्षाथे अदितिं दितिं च ॥ ५ ०६२ ०८
यद् बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा ।
तेन नो मित्रावरुणाव् अविष्टं सिषासन्तो जिगीवांसः स्याम ॥ ५ ०६२ ०९

(४१७)
ऋतस्य गोपाव् अधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि ।
यम् अत्र मित्रावरुणावथो युवं तस्मै वृष्टिर् मधुमत् पिन्वते दिवः ॥ ५ ०६३ ०१
सम्राजाव् अस्य भुवनस्य राजथो मित्रावरुणा विदथे स्वर्दृशा ।
वृष्टिं वां राधो अमृतत्वम् ईमहे द्यावापृथिवी वि चरन्ति तन्यवः ॥ ५ ०६३ ०२
सम्राजा उग्रा वृषभा दिवस् पती पृथिव्या मित्रावरुणा विचर्षणी ।
चित्रेभिर् अभ्रैर् उप तिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया ॥ ५ ०६३ ०३

मा॒या वा॑म् मित्रावरुणा दि॒वि श्रि॒ता सूर्यो॒ ज्योति॑श् चरति चि॒त्रम् आयु॑धम् ।
तम् अ॒भ्रेण॑ वृ॒ष्ट्या गू॑हथो दि॒वि पर्ज॑न्य द्र॒प्सा मधु॑मन्त ईरते ॥ ५ ०६३ ०४
रथं॑ युञ्जते म॒रुतः॑ शु॒भे सु॒खं शूरो॒ न मि॑त्रावरुणा॒ गवि॑ष्टिषु ।
रजां॑सि चि॒त्रा वि च॑रन्ति त॒न्यवो॑ दि॒वः स॑म्राजा॒ पय॑सा न उक्षतम् ॥ ५ ०६३ ०५
वा॒चं सु मि॑त्रावरुणा॒व् इरा॑वतीम् प॒र्जन्य॑श् चि॒त्रां व॑दति॒ त्विषी॑मतीम् ।
अ॒भ्रा व॑सत म॒रुतः॒ सु मा॒यया॒ द्यां व॑र्षयतम् अ॒रुणाम् अ॑रे॒पस॑म् ॥ ५ ०६३ ०६
धर्म॑णा मित्रावरुणा विपश्चिता व्र॒ता र॑क्षेथे॒ असु॑रस्य मा॒यया॑ ।
ऋ॒तेन॒ विश्व॒म् भुव॑नं॒ वि रा॑जथः॒ सूर्य॒म् आ ध॑त्थो दि॒वि चित्र्यं॒ रथ॑म् ॥ ५ ०६३ ०७

(४१८)
वरु॑णं वो रि॒शाद॑सम् ऋ॒चा मि॒त्रं ह॑वामहे ।
परि॑ व्र॒जेव॑ बा॒ह्वोर् ज॑ग॒न्वांसा॒ स्वर्णरम् ॥ ५ ०६४ ०१
ता बा॒हवा॑ सु॒चेतु॒ना प्र य॑न्तम् अस्मा॒ अर्च॑ते ।
शेवं॒ हि जा॒र्यं॑ वां॒ विश्वा॑सु॒ क्षासु॒ जोगु॑वे ॥ ५ ०६४ ०२
यन् नू॒नम् अ॒श्यां गति॑म् मि॒त्रस्य॑ यायाम् प॒था ।
अस्य॑ प्रि॒यस्य॒ शर्म॒ण्य् अहिं॑सानस्य सश्चिरे ॥ ५ ०६४ ०३
यु॒वाभ्या॑म् मित्रावरुणोप॒मं धे॑याम् ऋ॒चा ।
यद् ध॒ क्षये॑ म॒घोनां॑ स्तोतॄ॒णां च॑ स्पू॒र्धसे॑ ॥ ५ ०६४ ०४
आ नो॑ मित्र सु॒दीति॑भि॒र् वरु॑णश् च स॒धस्थ॒ आ ।
स्वे क्षये॑ म॒घोनां॒ सखी॑नां च वृ॒धसे॑ ॥ ५ ०६४ ०५
यु॒वं नो॒ येषु॑ वरुण क्ष॒त्रम् बृ॒हच् च॑ बिभृ॒थः ।
उ॒रु णो॒ वाज॑सातये कृ॒तं रा॒ये स्व॒स्तये॑ ॥ ५ ०६४ ०६
उ॒च्छन्त्या॑म् मे यज॒ता दे॒वक्ष॑त्रे॒ रुश॑द्गवि ।
सु॒तं सोमं॒ न ह॒स्तिभि॒र् आ प॒ड्भिर् धा॑वतं नरा॒ बिभ्र॑ताव् अर्च॒नान॑सम् ॥ ५ ०६४ ०७

(४१९)

यश् चिकेत स सुक्रतुर् देवत्रा स ब्रवीतु नः ।
वरुणो यस्य दर्शतो मित्रो वा वनते गिरः ॥ ५ ०६५ ०१
ता हि श्रेष्ठवर्चसा राजाना दीर्घश्रुत्तमा ।
ता सत्पती ऋतावृध ऋतावाना जने-जने ॥ ५ ०६५ ०२
ता वाम् इयानो ऽवसे पूर्वा उप ब्रुवे सचा ।
स्वश्वासः सु चेतुना वाजाँ अभि प्र दावने ॥ ५ ०६५ ०३
मित्रो अंहोश् चिद् आद् उरु क्षयाय गातुं वनते ।
मित्रस्य हि प्रतूर्वतः सुमतिर् अस्ति विधतः ॥ ५ ०६५ ०४
वयम् मित्रस्यावसि स्याम सप्रथस्तमे ।
अनेहसस् त्वोतयः सत्रा वरुणशेषसः ॥ ५ ०६५ ०५
युवम् मित्रेमं जनं यतथः सं च नयथः ।
मा मघोनः परि ख्यतम् मो अस्माकम् ऋषीणां गोपीथे न उरुष्यतम् ॥ ५ ०६५ ०६

(४२०)
आ चिकितान सुक्रतू देवौ मर्त रिशादसा ।
वरुणाय ऋतपेशसे दधीत प्रयसे महे ॥ ५ ०६६ ०१
ता हि क्षत्रम् अविह्रुतं सम्यग् असुर्य १ म् आशाते ।
अध व्रतेव मानुषं स्व १ र् ण धायि दर्शतम् ॥ ५ ०६६ ०२
ता वाम् एषे रथानाम् उर्वीं गव्यूतिम् एषाम् ।
रातहव्यस्य सुष्टुतिं दधृक् स्तोमैर् मनामहे ॥ ५ ०६६ ०३
अधा हि काव्या युवं दक्षस्य पूर्भिर् अद्भुता ।
नि केतुना जनानां चिकेथे पूतदक्षसा ॥ ५ ०६६ ०४
तद् ऋतम् पृथिवि बृहच् छ्रवएष ऋषीणाम् ।
ज्रयसानाव् अरम् पृथ्व् अति क्षरन्ति यामभिः ॥ ५ ०६६ ०५
आ यद् वाम् ईयचक्षसा मित्र वयं च सूरयः ।
व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये ॥ ५ ०६६ ०६

(४२१)

बळ् इ॒त्था दे॑व निष्कृ॒तम् आदि॑त्या यज॒तम् बृ॒हत् ।
वरु॑ण॒ मित्रार्य॑म॒न् वर्षि॑ष्ठं क्ष॒त्रम् आ॑शाथे ॥ ५ ०६७ ०१
आ यद् योनिं॑ हि॒रण्ययं॒ वरु॑ण॒ मित्र॒ सद॑थः ।
ध॒र्तारा॑ चर्षणी॒नां य॒न्तं सु॒म्नं रि॑शादसा ॥ ५ ०६७ ०२
विश्वे॒ हि वि॒श्ववे॑दसो॒ वरु॑णो मि॒त्रो अ॑र्य॒मा ।
व्र॒ता प॒देव॑ सश्चिरे॒ पान्ति॒ मर्त्यं॑ रि॒षः ॥ ५ ०६७ ०३
ते हि स॒त्या ऋ॑त॒स्पृश॑ ऋ॒तावा॑नो॒ जने॑-जने ।
सु॒नी॒थासः॑ सु॒दान॑वो ऽं॒होश् चि॑द् उरु॒चक्र॑यः ॥ ५ ०६७ ०४
को नु वा॑म् मित्रास्तु॑तो॒ वरु॑णो वा त॒नूना॑म् ।
तत् सु वा॒म् एष॑ते म॒तिर् अत्रि॑भ्य॒ एष॑ते म॒तिः ॥ ५ ०६७ ०५

(४२२)

प्र वो॑ मि॒त्राय॑ गायत॒ वरु॑णाय वि॒पा गि॒रा ।
महि॑क्षत्राव् ऋ॒तम् बृ॒हत् ॥ ५ ०६८ ०१
स॒म्राजा॒ या घृ॒तयो॑नी मि॒त्रश् चो॒भा वरु॑णश् च ।
दे॒वा दे॒वेषु॑ प्रश॒स्ता ॥ ५ ०६८ ०२
ता नः॑ शक्त॒म् पार्थि॑वस्य म॒हो रा॒यो दि॒व्यस्य॑ ।
महि॑ वां क्ष॒त्रं दे॒वेषु॑ ॥ ५ ०६८ ०३
ऋ॒तम् ऋ॒तेन॒ सप॑न्तेषि॒रं दक्ष॑म् आशाते ।
अ॒द्रुहा॑ दे॒वौ व॑र्धते ॥ ५ ०६८ ०४
वृ॒ष्टिद्या॑वा री॒त्यापे॒षस् पती॒ दानु॑मत्याः ।
बृ॒हन्तं॒ गर्त॑म् आशाते ॥ ५ ०६८ ०५

(४२३)

त्री रो॑च॒ना व॑रुण॒ त्रीर् उ॒त द्यून् त्रीणि॑ मित्र धारयथो॒ रजां॑सि ।
वा॒वृ॒धा॒नाव् अ॒मतिं॑ क्ष॒त्रिय॒स्यानु॑ व्र॒तं रक्ष॑माणाव् अजु॒र्यम् ॥ ५ ०६९ ०१
इरा॑वतीर् वरुण धे॒नवो॑ वा॒म् मधु॑मद् वां॒ सिन्ध॑वो मित्र दुह्रे ।
त्रय॑स् तस्थुर् वृ॒ष॒भास॑स् तिसृ॒णां धि॒षणा॑नां रेतो॒धा वि द्यु॒मन्तः॑ ॥ ५ ०६९ ०२
प्रा॒तर् दे॒वीम् अदि॑तिं जोहवीमि म॒ध्यंदि॑न॒ उदि॑ता॒ सूर्य॑स्य ।
रा॒ये मि॑त्रावरुणा स॒र्वता॒तेळे॑ तो॒काय॒ तन॑याय॒ शं योः ॥ ५ ०६९ ०३
या ध॒र्तारा॑ रज॑सो रोच॒नस्यो॒तादि॒त्या दि॒व्या पार्थि॑वस्य ।
न वां॑ दे॒वा अ॒मृता॒ आ मि॑नन्ति व्र॒तानि॑ मित्रावरुणा ध्रु॒वाणि॑ ॥ ५ ०६९ ०४

(४२४)
पु॒रू॒रुणा॑ चि॒द् ध्य् अस्त्य् अवो॑ नू॒नं वां॑ वरुण ।
मित्र॒ वंसि॑ वां सु॒म॒तिम् ॥ ५ ०७० ०१
ता वां॑ स॒म्यग् अ॑द्रुह्वा॒णेष॑म् अश्याम॒ धाय॑से ।
व॒यं ते रु॑द्रा स्याम ॥ ५ ०७० ०२
पा॒तं नो॑ रुद्रा पा॒युभि॑र् उ॒त त्रा॑येथां सुत्रा॒त्रा ।
तु॒र्याम॒ दस्यू॑न् त॒नूभिः॑ ॥ ५ ०७० ०३
मा कस्या॑द्भुतक्रतू य॒क्षम् भु॑जेमा त॒नूभिः॑ ।
मा शेष॑सा॒ मा तन॑सा ॥ ५ ०७० ०४

(४२५)
आ नो॑ गन्तं रिशादसा॒ वरु॑ण॒ मित्र॑ ब॒र्हणा॑ ।
उपे॒मं चारु॑म् अध्व॒रम् ॥ ५ ०७१ ०१
विश्व॑स्य॒ हि प्र॑चेतसा॒ वरु॑ण॒ मित्र॒ राज॑थः ।
ई॒शा॒ना पि॑प्यतं॒ धियः॑ ॥ ५ ०७१ ०२
उप॑ नः सु॒तम् आ ग॑तं॒ वरु॑ण॒ मित्र॑ दा॒शुषः॑ ।
अ॒स्य सोम॑स्य पी॒तये॑ ॥ ५ ०७१ ०३

(४२६)
आ मित्रे वरुणे वयं गीर्भिर् जुहुमो अत्रिवत् ।
नि बर्हिषि सदतं सोमपीतये ॥ ५ ०७२ ०१
व्रतेन स्थो ध्रुवक्षेमा धर्मणा यातयज्जना ।
नि बर्हिषि सदतं सोमपीतये ॥ ५ ०७२ ०२
मित्रश् च नो वरुणश् च जुषेतां यज्ञम् इष्टये ।
नि बर्हिषि सदतां सोमपीतये ॥ ५ ०७२ ०३

(४२७)
यद् अद्य स्थः परावति यद् अर्वावत्य् अश्विना ।
यद् वा पुरू पुरुभुजा यद् अन्तरिक्ष आ गतम् ॥ ५ ०७३ ०१
इह त्या पुरुभूतमा पुरू दंसांसि बिभ्रता ।
वरस्या याम्य् अध्रिगू हुवे तुविष्टमा भुजे ॥ ५ ०७३ ०२
ईर्मान्यद् वपुषे वपुश् चक्रं रथस्य येमथुः ।
पर्य् अन्या नाहुषा युगा मह्ना रजांसि दीयथः ॥ ५ ०७३ ०३
तद् ऊ षु वाम् एना कृतं विश्वा यद् वाम् अनु ष्टवे ।
नाना जाताव् अरेपसा सम् अस्मे बन्धुम् एयथुः ॥ ५ ०७३ ०४
आ यद् वां सूर्या रथं तिष्ठद् रघुष्यदं सदा ।
परि वाम् अरुषा वयो घृणा वरन्त आतपः ॥ ५ ०७३ ०५
युवोर् अत्रिश् चिकेतति नरा सुम्नेन चेतसा ।
घर्मं यद् वाम् अरेपसं नासत्यास्ना भुरण्यति ॥ ५ ०७३ ०६
उग्रो वां ककुहो ययिः शृण्वे यामेषु संतनिः ।
यद् वां दंसोभिर् अश्विनात्रिर् नराववर्तति ॥ ५ ०७३ ०७
मध्व ऊ षु मधूयुवा रुद्रा सिषक्ति पिप्युषी ।
यत् समुद्राति पर्षथः पक्वाः पृक्षो भरन्त वाम् ॥ ५ ०७३ ०८

सत्यम् इद् वा उ अश्विना युवाम् आहुर् मयोभुवा ।
ता यामन् यामहूतमा यामन्न् आ मृळयत्तमा ॥ ५ ०७३ ०९
इमा ब्रह्माणि वर्धनाश्विभ्यां सन्तु शंतमा ।
या तक्षाम रथाँ इवावोचाम बृहन् नमः ॥ ५ ०७३ १०

(४२८)
कूष्ठो देवाव् अश्विनाद्या दिवो मनावसू ।
तच् छ्रवथो वृषण्वसू अत्रिर् वाम् आ विवासति ॥ ५ ०७४ ०१
कुह त्या कुह नु श्रुता दिवि देवा नासत्या ।
कस्मिन्न् आ यतथो जने को वां नदीनां सचा ॥ ५ ०७४ ०२
कं याथः कं ह गच्छथः कम् अच्छा युञ्जाथे रथम् ।
कस्य ब्रह्माणि रण्यथो वयं वाम् उश्मसीष्टये ॥ ५ ०७४ ०३
पौरं चिद् ध्य् उदप्रुतम् पौर पौराय जिन्वथः ।
यद् ईं गृभीततातये सिंहम् इव द्रुहस् पदे ॥ ५ ०७४ ०४
प्र च्यवानाज् जुजुरुषो वव्रिम् अत्कं न मुञ्चथः ।
युवा यदी कृथः पुनर् आ कामम् ऋण्वे वध्वः ॥ ५ ०७४ ०५
अस्ति हि वाम् इह स्तोता स्मसि वां संदृशि श्रिये ।
नू श्रुतम् म आ गतम् अवोभिर् वाजिनीवसू ॥ ५ ०७४ ०६
को वाम् अद्य पुरूणाम् आ वव्ने मर्त्यानाम् ।
को विप्रो विप्रवाहसा को यज्ञैर् वाजिनीवसू ॥ ५ ०७४ ०७
आ वां रथो रथानां येष्ठो यात्व् अश्विना ।
पुरू चिद् अस्मयुस् तिर आङ्गूषो मर्त्येष्व् आ ॥ ५ ०७४ ०८
शम् ऊ षु वाम् मधूयुवास्माकम् अस्तु चर्कृतिः ।
अर्वाचीना विचेतसा विभिः श्येनेव दीयतम् ॥ ५ ०७४ ०९
अश्विना यद् ध कर्हि चिच् छुश्रूयातम् इमं हवम् ।
वस्वीर् ऊ षु वाम् भुजः पृञ्चन्ति सु वाम् पृचः ॥ ५ ०७४ १०

(४२९)

प्रति प्रियतमं रथं वृषणं वसुवाहनम् ।
स्तोता वाम् अश्विनाव् ऋषि स्तोमेन प्रति भूषति माध्वी मम श्रुतं हवम् ॥ ५ ०७५ ०१
अत्यायातम् अश्विना तिरो विश्वा अहं सना ।
दस्रा हिरण्यवर्तनी सुषुम्ना सिन्धुवाहसा माध्वी मम श्रुतं हवम् ॥ ५ ०७५ ०२
आ नो रत्नानि बिभ्रताव् अश्विना गच्छतं युवम् ।
रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवम् ॥ ५ ०७५ ०३
सुष्टुभो वां वृषण्वसू रथे वाणीच्य् आहिता ।
उत वां ककुहो मृगः पृक्षः कृणोति वापुषो माध्वी मम श्रुतं हवम् ॥ ५ ०७५ ०४
बोधिन्मनसा रथ्येषिरा हवनश्रुता ।
विभिश् च्यवानम् अश्विना नि याथो अद्वयाविनम् माध्वी मम श्रुतं हवम् ॥ ५ ०७५ ०५
आ वां नरा मनोयुजो ऽश्वासः प्रुषितप्सवः ।
वयो वहन्तु पीतये सह सुम्नेभिर् अश्विना माध्वी मम श्रुतं हवम् ॥ ५ ०७५ ०६
अश्विनाव् एह गच्छतं नासत्या मा वि वेनतम् ।
तिरश् चिद् अर्यया परि वर्तिर् यातम् अदाभ्या माध्वी मम श्रुतं हवम् ॥ ५ ०७५ ०७
अस्मिन् यज्ञे अदाभ्या जरितारं शुभस् पती ।
अवस्युम् अश्विना युवं गृणन्तम् उप भूषथो माध्वी मम श्रुतं हवम् ॥ ५ ०७५ ०८
अभूद् उषा रुशत्पशुर् आग्निर् अधाय्य् ऋत्वियः ।
अयोजि वां वृषण्वसू रथो दस्राव् अमर्त्यो माध्वी मम श्रुतं हवम् ॥ ५ ०७५ ०९

(४३०)

आ भात्य् अग्निर् उषसाम् अनीकम् उद् विप्राणां देवया वाचो अस्थुः ।
अर्वाञ्चा नूनं रथ्येह यातम् पीपिवांसम् अश्विना घर्मम् अच्छ ॥ ५ ०७६ ०१
न संस्कृतम् प्र मिमीतो गमिष्ठान्ति नूनम् अश्विनोपस्तुतेह ।
दिवाभिपित्वे ऽवसागमिष्ठा प्रत्य् अवर्तिं दाशुषे शम्भविष्ठा ॥ ५ ०७६ ०२

उता यातं संगवे प्रातर् अह्नो मध्यंदिन उदिता सूर्यस्य ।
दिवा नक्तम् अवसा शंतमेन नेदानीम् पीतिर् अश्विना ततान ॥ ५ ०७६ ०३
इदं हि वाम् प्रदिवि स्थानम् ओक इमे गृहा अश्विनेदं दुरोणम् ।
आ नो दिवो बृहतः पर्वताद् आद्भ्यो यातम् इषम् ऊर्जं वहन्ता ॥ ५ ०७६ ०४
सम् अश्विनोर् अवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतम् ओत वीरान् आ विश्वान्य् अमृता सौभगानि ॥ ५ ०७६ ०५

(४३१)
प्रातर्यावाणा प्रथमा यजध्वम् पुरा गृध्राद् अररुषः पिबातः ।
प्रातर् हि यज्ञम् अश्विना दधाते प्र शंसन्ति कवयः पूर्वभाजः ॥ ५ ०७७ ०१
प्रातर् यजध्वम् अश्विना हिनोत न सायम् अस्ति देवया अजुष्टम् ।
उतान्यो अस्मद् यजते वि चावः पूर्वः-पूर्वो यजमानो वनीयान् ॥ ५ ०७७ ०२
हिरण्यत्वङ् मधुवर्णो घृतस्नुः पृक्षो वहन्न् आ रथो वर्तते वाम् ।
मनोजवा अश्विना वातरंहा येनातियाथो दुरितानि विश्वा ॥ ५ ०७७ ०३
यो भूयिष्ठं नासत्याभ्यां विवेष चनिष्ठम् पित्वो ररते विभागे ।
स तोकम् अस्य पीपरच् छमीभिर् अनूर्ध्वभासः सदम् इत् तुतुर्यात् ॥ ५ ०७७ ०४
सम् अश्विनोर् अवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतम् ओत वीरान् आ विश्वान्य् अमृता सौभगानि ॥ ५ ०७७ ०५

(४३२)
अश्विनाव् एह गच्छतं नासत्या मा वि वेनतम् ।
हंसाव् इव पततम् आ सुताꣳ उप ॥ ५ ०७८ ०१
अश्विना हरिणाव् इव गौराव् इवानु यवसम् ।
हंसाव् इव पततम् आ सुताꣳ उप ॥ ५ ०७८ ०२
अश्विना वाजिनीवसू जुषेथां यज्ञम् इष्टये ।
हंसाव् इव पततम् आ सुताꣳ उप ॥ ५ ०७८ ०३

अत्रिर् यद् वाम् अवरोहन्न् ऋबीसम् अजोहवीन् नाधमानेव योषा ।
श्येनस्य चिज् जवसा नूतनेनागच्छतम् अश्विना शंतमेन ॥ ५ ०७८ ०४
वि जिहीष्व वनस्पते योनिः सूष्यन्त्या इव ।
श्रुतम् मे अश्विना हवं सप्तवध्रिं च मुञ्चतम् ॥ ५ ०७८ ०५
भीताय नाधमानाय ऋषये सप्तवध्रये ।
मायाभिर् अश्विना युवं वृक्षं सं च वि चाचथः ॥ ५ ०७८ ०६
यथा वातः पुष्करिणीं समिङ्गयति सर्वतः ।
एवा ते गर्भ एजतु निरैतु दशमास्यः ॥ ५ ०७८ ०७
यथा वातो यथा वनं यथा समुद्र एजति ।
एवा त्वं दशमास्य सहावेहि जरायुणा ॥ ५ ०७८ ०८
दश मासाञ् छशयानः कुमारो अधि मातरि ।
निरैतु जीवो अक्षतो जीवो जीवन्त्या अधि ॥ ५ ०७८ ०९

(४३३)
महे नो अद्य बोधयोषो राये दिवित्मती ।
यथा चिन् नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ ५ ०७९ ०१
या सुनीथे शौचद्रथे व्य् औच्छो दुहितर् दिवः ।
सा व्य् उच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ ५ ०७९ ०२
सा नो अद्याभरद्वसुर् व्य् उच्छा दुहितर् दिवः ।
यो व्य् औच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ ५ ०७९ ०३
अभि ये त्वा विभावरि स्तोमैर् गृणन्ति वह्नयः ।
मघैर् मघोनि सुश्रियो दामन्वन्तः सुरातयः सुजाते अश्वसूनृते ॥ ५ ०७९ ०४
यच् चिद् धि ते गणा इमे छदयन्ति मघत्तये ।
परि चिद् वष्टयो दधुर् ददतो राधो अह्रयं सुजाते अश्वसूनृते ॥ ५ ०७९ ०५
ऐषु धा वीरवद् यश उषो मघोनि सूरिषु ।
ये नो राधांस्य् अह्रया मघवानो अरासत सुजाते अश्वसूनृते ॥ ५ ०७९ ०६
तेभ्यो द्युम्नम् बृहद् यश उषो मघोन्य् आ वह ।

ये नो॒ राधां॒स्य् अश्व्या॑ ग॒व्या भज॑न्त सू॒रयः॑ सुजा॑ते॒ अश्व॑सूनृते ॥ ५ ०७९ ०७
उ॒त नो॒ गोम॑ती॒र् इष॒ आ व॑हा दुहितर् दिवः ।
सा॒कं सूर्य॑स्य र॒श्मिभिः॑ शु॒क्रैः शोच॑द्भिर् अ॒र्चिभिः॒ सुजा॑ते॒ अश्व॑सूनृते ॥ ५ ०७९ ०८
व्य् उच्छा दु॒हितर् दिवो॒ मा चि॒रं त॑नु॒था अपः॑ ।
नेत् त्वा॑ स्ते॒नं यथा॑ रि॒पुं तपा॑ति॒ सूरो॑ अ॒र्चिषा॒ सुजा॑ते॒ अश्व॑सूनृते ॥ ५ ०७९ ०९
ए॒ताव॒द् वेद् उ॑ष॒स् त्वम् भूयो॑ वा॒ दातु॑म् अर्हसि ।
या स्तो॒तृभ्यो॑ विभावर्य् उ॒च्छन्ती॒ न प्र॒मीय॑से॒ सुजा॑ते॒ अश्व॑सूनृते ॥ ५ ०७९ १०

(४३४)
द्यु॒तद्या॑मानम् बृ॒हतीम् ऋ॒तेन॑ ऋ॒ताव॑रीम् अ॒रुण॑प्सुं विभा॒तीम् ।
दे॒वीम् उ॒षसं॒ स्व॑र् आ॒वह॑न्ती॒म् प्रति॒ विप्रा॑सो म॒तिभि॑र् जरन्ते ॥ ५ ०८० ०१
ए॒षा जन॑ं दर्श॑ता बो॒धय॑न्ती सु॒गान् प॒थः कृ॑ण्वती या॒त्य् अग्रे॑ ।
बृ॒ह॒द्र॒था बृ॑ह॒ती वि॑श्वमि॒न्वोषा ज्योति॑र् यच्छ॒त्य् अग्रे॒ अह्ना॑म् ॥ ५ ०८० ०२
ए॒षा गोभि॑र् अ॒रुणेभि॑र् यु॒जानास्रे॑धन्ती र॒यिम् अप्रा॑यु चक्रे ।
प॒थो रद॑न्ती सुवि॒ताय॑ दे॒वी पु॑रुष्टु॒ता वि॒श्ववा॑रा॒ वि भा॑ति ॥ ५ ०८० ०३
ए॒षा व्येनी भवति द्वि॒बर्हा॑ आविष्कृ॒ण्वा॒ना त॒न्वम् पु॒रस्ता॑त् ।
ऋ॒तस्य॒ पन्था॒म् अन्व् ए॑ति सा॒धु प्र॑जान॒तीव॒ न दिशो॑ मिनाति ॥ ५ ०८० ०४
ए॒षा शु॒भ्रा न त॒न्वो विदा॒नोर्ध्वेव॑ स्ना॒ती दृ॒शये॑ नो अस्थात् ।
अप॒ द्वेषो॒ बाध॑माना॒ तमां॑स्य् उ॒षा दि॒वो दु॑हि॒ता ज्योति॒षागा॑त् ॥ ५ ०८० ०५
ए॒षा प्र॑ती॒ची दु॑हि॒ता दि॒वो नॄन् योषे॑व भ॒द्रा नि रि॑णीते॒ अप्सः॑ ।
व्यू॒र्ण्व॒ती दा॒शुषे॒ वार्या॑णि॒ पुन॒र् ज्योति॑र् युव॒तिः पू॒र्वथा॑कः ॥ ५ ०८० ०६

(४३५)
यु॒ञ्जते॒ मन॑ उ॒त यु॑ञ्जते॒ धियो॒ विप्रा॒ विप्र॑स्य बृह॒तो वि॑प॒श्चितः॑ ।
वि होत्रा॑ दधे वयुना॒विद् एक॒ इन् म॒ही दे॒वस्य॑ सवि॒तुः परि॑ष्टुतिः ॥ ५ ०८१ ०१
विश्वा॑ रू॒पाणि॒ प्रति॑ मुञ्चते क॒विः प्रासा॑वीद् भ॒द्रं द्वि॒पदे॒ चतु॑ष्पदे ।

वि नाकम् अख्यत् सविता वरेण्यो ऽनु प्रयाणम् उषसो वि राजति ॥ ५ ०८१ ०२
यस्य प्रयाणम् अन्व् अन्य इद् ययुर् देवा देवस्य महिमानम् ओजसा ।
यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना ॥ ५ ०८१ ०३
उत यासि सवितस् त्रीणि रोचनोत सूर्यस्य रश्मिभिः सम् उच्यसि ।
उत रात्रीम् उभयतः परीयस उत मित्रो भवसि देव धर्मभिः ॥ ५ ०८१ ०४
उतेशिषे प्रसवस्य त्वम् एक इद् उत पूषा भवसि देव यामभिः ।
उतेदं विश्वम् भुवनं वि राजसि श्यावाश्वस् ते सवित स्तोमम् आनशे ॥ ५ ०८१ ०४

(४३६)
तत् सवितुर् वृणीमहे वयं देवस्य भोजनम् ।
श्रेष्ठं सर्वधातमं तुरम् भगस्य धीमहि ॥ ५ ०८२ ०१
अस्य हि स्वयशस्तरं सवितुः कच् चन प्रियम् ।
न मिनन्ति स्वराज्यम् ॥ ५ ०८२ ०२
स हि रत्नानि दाशुषे सुवाति सविता भगः ।
तम् भागं चित्रम् ईमहे ॥ ५ ०८२ ०३
अद्या नो देव सवितः प्रजावत् सावीः सौभगम् ।
परा दुष्वप्न्यं सुव ॥ ५ ०८२ ०४
विश्वानि देव सवितर् दुरितानि परा सुव ।
यद् भद्रं तन् न आ सुव ॥ ५ ०८२ ०५
अनागसो अदितये देवस्य सवितुः सवे ।
विश्वा वामानि धीमहि ॥ ५ ०८२ ०६
आ विश्वदेवं सत्पतिं सूक्तैर् अद्या वृणीमहे ।
सत्यसवं सवितारम् ॥ ५ ०८२ ०७
य इमे उभे अहनी पुर एत्य् अप्रयुच्छन् ।
स्वाधीर् देवः सविता ॥ ५ ०८२ ०८
य इमा विश्वा जातान्य् आश्रावयति श्लोकेन ।
प्र च सुवाति सविता ॥ ५ ०८२ ०९

(४३७)
अच्छा वद तवसं गीर्भिर् आभि स्तुहि पर्जन्यं नमसा विवास ।
कनिक्रदद् वृषभो जीरदानू रेतो दधात्य् ओषधीषु गर्भम् ॥ ५ ०८३ ०१
वि वृक्षान् हन्त्य् उत हन्ति रक्षसो विश्वम् बिभाय भुवनम् महावधात् ।
उतानागा ईषते वृष्ण्यावतो यत् पर्जन्य स्तनयन् हन्ति दुष्कृतः ॥ ५ ०८३ ०२
रथीव कशयाश्वाँ अभिक्षिपन्न् आविर् दूतान् कृणुते वर्ष्याँ अह ।
दूरात् सिंहस्य स्तनथा उद् ईरते यत् पर्जन्यः कृणुते वर्ष्यं नभः ॥ ५ ०८३ ०३
प्र वाता वान्ति पतयन्ति विद्युत उद् ओषधीर् जिहते पिन्वते स्वः ।
इरा विश्वस्मै भुवनाय जायते यत् पर्जन्यः पृथिवीं रेतसावति ॥ ५ ०८३ ०४
यस्य व्रते पृथिवी नन्नमीति यस्य व्रते शफवज् जर्भुरीति ।
यस्य व्रत ओषधीर् विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥ ५ ०८३ ०५
दिवो नो वृष्टिम् मरुतो ररीध्वम् प्र पिन्वत वृष्णो अश्वस्य धाराः ।
अर्वाङ् एतेन स्तनयित्नुनेह्य् अपो निषिञ्चन्न् असुरः पिता नः ॥ ५ ०८३ ०६
अभि क्रन्द स्तनय गर्भम् आ धा उदन्वता परि दीया रथेन ।
दृतिं सु कर्ष विषितं न्यञ्चं समा भवन्तूद्वतो निपादाः ॥ ५ ०८३ ०७
महान्तं कोशम् उद् अचा नि षिञ्च स्यन्दन्तां कुल्या विषिताः पुरस्तात् ।
घृतेन द्यावापृथिवी व्य् उन्धि सुप्रपाणम् भवत्व् अघ्न्याभ्यः ॥ ५ ०८३ ०८
यत् पर्जन्य कनिक्रदत् स्तनयन् हंसि दुष्कृतः ।
प्रतीदं विश्वम् मोदते यत् किं च पृथिव्याम् अधि ॥ ५ ०८३ ०९
अवर्षीर् वर्षम् उद् उ षू गृभायाकर् धन्वान्य् अत्येतवा उ ।
अजीजन ओषधीर् भोजनाय कम् उत प्रजाभ्यो ऽविदो मनीषाम् ॥ ५ ०८३ १०

(४३८)
बळ् इत्था पर्वतानां खिद्रम् बिभर्षि पृथिवि ।
प्र या भूमिम् प्रवत्वति मह्ना जिनोषि महिनि ॥ ५ ०८४ ०१

स्तोमा॑सस् त्वा विचारिणि॒ प्रति॑ ष्टोभन्त्य् अ॒क्तुभिः॑ ।
प्र या वाजं॒ न हेष॑न्तम् पे॒रुम् अस्य॑स्य् अर्जुनि ॥ ५ ०८४ ०२
दृ॒ळ्हा चि॒द् या व॒नस्पती॑न् क्ष्म॒या दर्ध॒र्ष्य् ओज॑सा ।
यत् ते॑ अ॒भ्रस्य॑ वि॒द्युतो॑ दि॒वो वर्ष॑न्ति वृ॒ष्टयः॑ ॥ ५ ०८४ ०३

(४३९)
प्र स॒म्राजे॑ बृ॒हद् अ॑र्चा गभी॒रम् ब्रह्म॑ प्रि॒यं वरु॑णाय श्रु॒ताय॑ ।
वि यो ज॒घान॑ शमि॒तेव॒ चर्मो॒पस्ति॑रे पृथि॒वीं सूर्या॑य ॥ ५ ०८५ ०१
वने॑षु॒ व्य् अ १॒ न्तरि॑क्षं ततान॒ वाज॒म् अर्व॑त्सु॒ पय॑ उ॒स्रिया॑सु ।
हृ॒त्सु क्रतुं॒ वरु॑णो अ॒प्स्व् अ १॒ ग्निं दि॒वि सूर्य॑म् अदधा॒त् सोम॒म् अद्रौ॑ ॥ ५ ०८५ ०२
नी॒चीन॑बारं॒ वरु॑णः॒ कव॑न्धम् प्र स॑सर्ज॒ रोद॑सी अ॒न्तरि॑क्षम् ।
तेन॒ विश्व॑स्य॒ भुव॑नस्य॒ राजा॒ यवं॒ न वृ॒ष्टिर् व्य् उनत्ति॒ भूम॑ ॥ ५ ०८५ ०३
उ॒नत्ति॒ भूमि॑म् पृथि॒वीम् उ॒त द्यां य॒दा दु॒ग्धं वरु॑णो॒ वष्ट्य् आद् इत् ।
सम् अ॒भ्रेण॑ वसत॒ पर्व॑तासस् तविषी॒यन्तः॑ श्रथयन्त वी॒राः ॥ ५ ०८५ ०४
इ॒माम् ऊ॒ ष्व् आ॒सु॒रस्य॑ श्रु॒तस्य॑ म॒हीम् मा॒यां वरु॑णस्य॒ प्र वो॑चम् ।
माने॑नेव तस्थि॒वाँ अ॒न्तरि॑क्षे॒ वि यो म॒मे पृ॑थि॒वीं सूर्ये॑ण ॥ ५ ०८५ ०५
इ॒माम् ऊ॒ नु क॒वित॑मस्य मा॒याम् म॒हीं दे॒वस्य॒ नकि॒र् आ द॑धर्ष ।
एकं॒ यद् उ॒द्ना न पृ॒णन्त्य् एनी॑र् आसि॒ञ्चन्ती॑र् अ॒वन॑यः समु॒द्रम् ॥ ५ ०८५ ०६
अ॒र्य॒म्यं वरुण मि॒त्र्यं वा॒ सखा॑यं वा॒ सद॒म् इद् भ्रात॑रं वा ।
वे॒शं वा॒ नित्यं॑ वरु॒णार॑णं वा॒ यत् सी॒म् आग॑श् चकृ॒मा शि॒श्र॒थस् तत् ॥ ५ ०८५ ०७
कि॒त॒वासो॒ यद् रि॑रि॒पुर् न दी॒वि यद् वा॑ घा स॒त्यम् उ॒त यन् न वि॒द्म ।
सर्वा॒ ता वि ष्य॑ शिथि॒रेव॑ दे॒वाधा॑ ते स्याम वरुण प्रि॒यासः॑ ॥ ५ ०८५ ०८

(४४०)
इन्द्रा॑ग्नी॒ यम् अव॑थ उ॒भा वाजे॑षु॒ मर्त्य॑म् ।
दृ॒ळ्हा चि॒त् स प्र भे॑दति द्यु॒म्ना वाणी॑र् इव त्रि॒तः ॥ ५ ०८६ ०१

या पृतनासु दुष्टरा या वाजेषु श्रवाय्या ।
या पञ्च चर्षणीर् अभीन्द्राग्नी ता हवामहे ॥ ५ ०८६ ०२
तयोर् इद् अमवच् छवस् तिग्मा दिद्युन् मघोनोः ।
प्रति द्रुणा गभस्त्योर् गवां वृत्रघ्न एषते ॥ ५ ०८६ ०३
ता वाम् एषे रथानाम् इन्द्राग्नी हवामहे ।
पती तुरस्य राधसो विद्वांसा गिर्वणस्तमा ॥ ५ ०८६ ०४
ता वृधन्ताव् अनु द्यून् मर्ताय देवाव् अदभा ।
अर्हन्ता चित् पुरो दधे ऽंशेव देवाव् अर्वते ॥ ५ ०८६ ०५
एवेन्द्राग्निभ्याम् अहावि हव्यं शूष्यं घृतं न पूतम् अद्रिभिः ।
ता सूरिषु श्रवो बृहद् रयिं गृणत्सु दिधृतम् इषं गृणत्सु दिधृतम् ॥ ५ ०८६ ०६

(४४१)
प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।
प्र शर्धाय प्रयज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ॥ ५ ०८७ ०१
प्र ये जाता महिना ये च नु स्वयम् प्र विद्मना ब्रुवत एवयामरुत् ।
क्रत्वा तद् वो मरुतो नाधृषे शवो दाना मह्ना तद् एषाम् अधृष्टासो नाद्रयः ॥ ५ ०८७ ०२
प्र ये दिवो बृहतः शृण्विरे गिरा सुशुक्वानः सुभ्व एवयामरुत् ।
न येषाम् इरी सधस्थ ईष्ट आँ अग्नयो न स्वविद्युतः प्र स्यन्द्रासो धुनीनाम् ॥ ५ ०८७ ०३
स चक्रमे महतो निर् उरुक्रमः समानस्मात् सदस एवयामरुत् ।
यदायुक्त त्मना स्वाद् अधि ष्णुभिर् विष्पर्धसो विमहसो जिगाति शेवृधो नृभिः ॥ ५ ०८७ ०४
स्वनो न वो ऽमवान् रेजयद् वृषा त्वेषो ययिस् तविष एवयामरुत् ।
येना सहन्त ऋञ्जत स्वरोचिष स्थारश्मानो हिरण्ययाः स्वायुधास इष्मिणः ॥ ५ ०८७ ०५
अपारो वो महिमा वृद्धशवसस् त्वेषं शवो ऽवत्व् एवयामरुत् ।

स्थातारो हि प्रसितौ संदृशि स्थन ते न उरुष्यता निदः शुशुक्वांसो नाग्नयः ॥ ५ ०८७ ०६
ते रुद्रासः सुमखा अग्नयो यथा तुविद्युम्ना अवन्त्व् एवयामरुत् ।
दीर्घम् पृथु पप्रथे सद्म पार्थिवं येषाम् अज्मेष्व् आ महः शर्धांस्य् अद्भुतैनसाम् ॥ ५ ०८७ ०७
अद्वेषो नो मरुतो गातुम् एतन श्रोता हवं जरितुर् एवयामरुत् ।
विष्णोर् महः समन्यवो युयोतन स्मद् रथ्यो न दंसनाप द्वेषांसि सनुतः ॥ ५ ०८७ ०८
गन्ता नो यज्ञं यज्ञियाः सुशमि श्रोता हवम् अरक्ष एवयामरुत् ।
ज्येष्ठासो न पर्वतासो व्योमनि यूयं तस्य प्रचेतसः स्यात दुर्धर्तवो निदः ॥ ५ ०८७ ०९